तत्वानंदीयसंगतिग्रंथः॥

॥श्रीगणेशायनमः॥ नमस्कृत्यगुरून्सर्वान्निगूढंमणिदीधितौ॥श्रीभवानंदीसिधांतवागीशेनप्रकाश्य
ते॥१॥ ॐनमइति॥परमात्मने॥सर्वोत्कृष्टात्मनेनमः॥उत्कर्षश्चजगतःसृष्टिस्थितिप्रलयकर्तृत्वं।ए
करूपस्यकथंसृष्ट्यादिविचित्रकार्यकारित्वंतत्रहेतुमाह॥ॐमिति॥ब्रह्मविष्णुशिवात्मकाथेत्य
र्थः॥ओंकारघटकैरकारोब्रह्मादीनांप्रतिपादनात्॥तस्यचनमस्कार्यताप्रयोजकंरूपांतरम
पिदर्शयति॥सर्वेति॥सर्वभूतानिसर्वप्राणिनःविष्टभ्यांतर्यामितयास्वस्वकार्येनियोजयन्तिष्ठते॥
अंतर्यामिणोभगवतःप्रेरणयैवसर्वप्राणिनांस्वस्वकार्येप्रवृत्तेरितिभावः॥विष्टंभश्चधारणात्मकः
संयोगविशेषःभूतपदंमूर्तपरं॥अतएवविश्वव्यापीविश्वशक्तिःपिनाकीत्यत्रविश्वशब्दोयाव
न्मूर्तवचनइत्याचार्याः॥अयनवदीश्वरसंयोगस्यैवब्रह्मांडादिपतनप्रतिबंधकत्वात्॥
अतएवद्यावापृथिवीविधृतेतिष्ठतइतिश्रुतिः॥एपिभवत्संयोगस्यधारकत्वमाहुरित्यपिवदंति
॥यत्तुषाकाशमीश्वरादितिरिच्यतइतिमतानुसारेणेदमिति॥तन्नईश्वरस्यैवाकाशतयाभूतपदे
वाच्यत्वेनतत्रैवतस्यातियौगिकसंयोगाभावात्॥अखंडोनित्यो आनंदबोधोयस्यतस्मैइत्य १

र्थः॥ नित्यंविज्ञानमानंदंब्रह्मेतिश्रुतिरपिब्रह्मस्वरूपावधारणपरा आनंद विशिष्टस्यविस्तत्वंप्र
तिपादयंति विशेषणस्यआनदस्यापिनित्यत्वंप्रतिपादयंति॥ तथाच श्रुतिवलासिद्धेनित्यसु
खेसुखत्वावांतरजातिरेवपुण्यजन्यतावछेदकत्वेनकल्प्यतइत्याशयः॥ अखंडोदुःखासं
भिन्नोआनंदोयस्मादेवंभूतोपासनात्मकोबोधोयस्येतिवार्थः॥ यस्येतिषष्ठ्यर्थोविषयता॥
दर्णायअप्रतिहतेछाय॥ ननुसंगतिप्रदर्शनानुमाननिरूपणप्रतिज्ञयोःप्रयोजनाभावःसं
गताभिधानस्यैवोन्मतप्रलपितत्वादिशंकनिरासप्रयोजनवत्वादत आह॥ पूर्वापरेति॥ संग
तिप्रदर्शनस्यफलमेकवाक्यताप्रतिपत्तिः॥ अनुमाननिरूपणप्रतिज्ञायाःफलंशिष्यवधान॥
मित्यर्थः॥ प्रयोजनवत्वादत आह॥ पूर्वापरेति॥ संगतिप्रदर्शनस्यफलमेकवाक्यत्वाप्र
तिपत्तिः॥ अनुमाननिरूपणप्रतिज्ञायाःफलंशिष्यावधानमित्यर्थः॥ प्रयोजनवतामवगम्य
पूर्वग्रंथेप्रवृत्तानांतदेकवाक्यताज्ञानेनैवोतरग्रंथेपितत्प्रयोजनवत्ताज्ञानेनप्रवृत्तिसंभवा
दितिभावः॥ तत्रच अर्थैक्यादेकंवाक्यंसाकांक्षंचेद्विभागेस्यादितिजैमिनिसूत्रं॥ तत्रार्थैका

दित्येतावन्मात्रेकृतेभगोवांतिजतुइषावांविभजन्तु इत्यनयोविभागरूपार्थैक्यादतिव्याप्तिः
अतःसाकांक्षत्वंचेदिति॥विभागेविछिद्यपाटेश्रोतुर्यदिपरस्परान्वयविषयिण्याकांक्षाभवति॥य
थाघटमानयेत्यत्रघटमित्युक्तेआनयेत्यनुक्तेआनयपश्यवेत्याकांक्षा॥एवमानयेत्येतावदुक्ते
घटंपटंवेतिश्रोतुराकांक्षाभगोवांविभजत्वित्यस्यविछेदेतुनेवमाकांक्षेतितद्व्युदासः॥तावन्मा
त्रेचस्योनंतेसदनंकृणोमिदातस्यधारयासुत्येवंकल्पयामितस्यधारयासुशेवंकल्पयामि
तस्मिन्सीदामृतेप्रतितिष्ठव्रीहीणांमेधसुमनस्यमानइत्यत्रकल्पयामीत्यंतःसदनार्थको
मंत्रःतस्मिन्नित्यादिरपरःसादनार्थकः॥एतयोश्चविभागेसाकांक्षत्वमस्तिकल्पयामीत्यंत
स्यविछेदेतस्मिन्कस्मिन्नित्याकांक्षासंभवतिअनोर्थैक्यादिति॥अत्रसदनसादनयोर्भेदादि
तिभावः॥अर्थैक्यंचनवाकार्थैक्यंप्रतिप्रकरणवाक्यार्थानांभेदात्॥किंतुतात्पर्यविषयैक्यं
प्रकृतेचप्रणतत्वविवेचनमेवचतुर्णांग्रंथानांतात्पर्यविषयःकारणकथनानंतरंकार्य
स्याकथनेकिमस्यकार्यमित्याकांक्षाचेति॥नचविभिन्नतात्पर्यकेपिप्रसंगादिसंगतेःसत्वा २

न्नसंगतिरीदृशैकवाक्यताव्याप्तेति कथं तथैकवाक्यताप्रतिपत्तिरिति वाच्यं॥ एकवाक्यपन्नयो रेव संगतिव्यवहारेण संगतिलक्षणेप्येकवाक्यताया अनुप्रवेशात्॥ विभिन्नतात्पर्यकसंग त्यभावादिति॥ प्रत्यक्षमित्यनंतरं अनुमितिनिरूपणे प्रत्यक्षप्रमाणानंतरं वानुमाननिरूपणे संगतेराकांक्षितत्वात्तुन्नयत्रैनतत्प्रदर्शनपरत्वं मूलस्याह॥ अत्रोपजीव्योपजीवकभाव इति ॥ अत्र प्रत्यक्षानुमानयोः॥ अत एव फलयोरेवादौ निरूपणात् फलत्वे इति प्रथमकल्पन्यस्तं॥ केचित्तु स्वरूपयोः फलयोश्च कार्यकारणभावोपि स्वरूपयोः संगतिः जिज्ञासोपयोगित्वादित्या हुः॥ उपजीवकत्वे संगतिः स चानंतराभिधानव्याप्या अत एवोपजीवकत्वादनंतरं निरूप्यत इति उक्तमिति॥ प्राच्यांमतमनुसृत्याह॥ प्रत्यक्षपरिग्रहः॥ न सर्वेति॥ अयं घट इति प्रत्यक्षे व्यभिचारा दित्यर्थः॥ तथा उपजीविकाननुयत्रानींद्रियमेव पक्षादि यथा परमाणुः आकाशसंयोगि गुरुत्वा दित्यादौ तत्र व्याप्तिज्ञानस्यानुमितिरूपत्वात् तज्जन्यानुमितौ न प्रत्यक्षोपजीवकत्वमत आह॥ अनु मिनयस्त्विति॥ तत्रापि मतनादि प्रत्यक्षस्य गुरुत्वाद्यनुमितिद्वारा उपजीव्यत्वादित्याह॥ परंपरया

वेति॥ननु यत्किंचित्सत्यसज्ज्ञाननिष्ठमुपजीवकत्वमपि संगतिर्वक्तव्यत्वाविनिगमनइत्यत आह॥उरस्कृ
तश्चेति॥अनंतराभिधानप्रयोजकतया कृतिना आदृत इत्यर्थः॥अयं अनुमितित्वरूपप्रमितिविभाजं
कोपाध्यवच्छिन्ननिष्ठः उपजीवकत्वोत्कर्षः उत्कृष्टोपजीवकता॥परंपरयोपजीवकत्वस्यापि संगति
त्वे प्रत्यक्षफलत्वावच्छेदेनापि तदस्तीत्याशंकते॥यद्यपीति॥अदृष्टजननीं अदृष्टप्रयोजिकां॥का
र्यमात्रंप्रति अदृष्टं हेतुः अदृष्टं च यागादिप्रवृत्त्यधीनं प्रवृत्तिश्चेष्टसाधनताधीसाध्या यागादाविष्ट
साधनस्यता ज्ञानं च वेदात् तत्र शक्तिग्रहः कारणं तच्चेदं पदमत्र शक्तं वृत्त्यंतरं विना द्रष्टेस्तत्र प्रयुज्य
मानत्वादित्यनुमितिरूपमितिं नवतीति शक्त्यानुमितेः प्रत्यक्षफलप्रयोजकत्वं॥समयः शक्तिः शक्तिग्रहा
येक्षया अव्यवधनेनोपजीव्याम् अनुमितिं दर्शयति॥मत्कर्तव्यतेति॥यागो मत्कृतिसाध्यः मत्कृतिं विना
असत्वे सतिसत्वादित्येवंरूपेत्यर्थः॥अदिनामदिष्टसाधनत्वानुमितिसंग्रहः॥नन्वेवमनुमितेरनुमिति
त्वरूपप्रमितिविभाजकोपाध्यवच्छेदेन प्रत्यक्षोपजीवकता न तु प्रत्यक्षप्रमितित्वावच्छेदेनानुमित्युप
पजीवकत्वमीश्वरप्रत्यक्षेऽभावादत आह॥ईश्वरप्रत्यक्षं त्विति॥तथा च फलयोर्निरूपरूपो फलता

वच्छेदकजावच्छेदेन उपजीवकत्वमेवपुरस्कर्तुमुचितं तत्त्वप्रकृते स्त्येवेत्यर्थः॥नच निरूप्यतावच्छेद
कावच्छेदेनोपजीवत्वमेवपुरस्कर्तुमुचितं निरूप्यतावच्छेदकंतु प्रत्यक्षत्वमीश्वरप्रत्यक्षसाधार
णमितिवाच्यं॥इंद्रियार्थसंन्निकर्षोत्पन्नमित्यादिनानिरूपितस्य प्रत्यक्षत्वस्येश्वरप्रत्यक्षावृत्तित्वादि
ति॥दृष्टद्वारकं दृष्टमात्रद्वारकं अदृष्टाद्वारकमितियावत्॥तच्चस्वजनकादृष्टाजनकजन्यत्वं ते
नादृष्टद्वारकस्यापिप्रवृत्त्यादिद्वारकत्वेपिनक्षतिः॥इद्द अनुमितौ तथात्वं उपजीवकत्वं इतरस्या
दृष्टद्वारकोपजीवकस्याविनिगम्यत्वात् विनिगमनाया अविषयत्वात्॥एकतरपक्षपातिनीहियु
क्तिर्विनिगमना अदृष्टाद्वारकोपजीवकत्वस्यचोभयसाधारणत्वात् नैकतरमात्रनिष्ठं प्रत्यक्षफलत्वअ
दृष्टद्वारकानुमित्युपजीवत्वकवदनुमानफलेप्यदृष्टद्वारकोपादानेप्रत्यक्षोपजीवकत्वस्यसत्वादि
त्यर्थः॥स्वरूपत उपजीवकतां विवृणोति॥सर्वं चेति॥इंद्रियापेक्षेति॥अनुमित्यात्मकव्याप्तिज्ञाने
पिपरंपरयेंद्रियस्यापेक्षणीयत्वमस्त्येवेतिभाव॥वस्तुतस्तु सर्वत्रमनोलक्षणेंद्रियजन्यत्वमस्त्येवे
तिभावः॥ननुव्याप्तिज्ञानत्वेनैवानुमितिकरणता तथाच कारणीभूतसीश्वरीयव्याप्तिज्ञानं नकिंचिद

पेक्षोत्पत्तिकमत आह॥ अनुमितिमितिभावयाःनुदादीनप्रत्यक्षविधयात्तत्सादयतः॥ तत्करणेति॥ अ
नुमितिफलोपहितकरणतानिर्वाहकप्रत्यासत्तिश्च विशेषणज्ञानत्वेनैव जनकतायां च सामानाधिक
रण्यं प्रत्यासत्तिः अत ईश्वरीयव्याप्तिज्ञानं नास्मदादिपरामर्शसंबंधेन फलोपहितं तथा च तादृशास्व
जन्यपरामर्षात्मकप्रत्यासत्तिविरहेण ईश्वरज्ञानस्यात्तत्वादनुमितिकरणताशून्यत्वात्॥ नित्यस्य
स्वरूपयोग्यत्वे फलावश्यंभावापत्तेः जन्यव्याप्तिज्ञानत्वेनैवानुमितिकरणता वाच्येत्याशयः॥ एते
ना प्रत्यासन्नस्यारण्यस्थदंडादेः करणत्वात्प्रत्यासत्त्यभावो न करणत्वभावसाधक इति प्रत्युक्तं
सामान्यतो नभिधानात्॥ यत्तु ईश्वरीयव्याप्तिज्ञानमपि स्वजन्यव्यापारसंबंधेन अनुमिति
फलोपहितं भवत्येव कार्यमात्रोपधायकस्य फलानुकूलव्यापारात्मकपरामर्शप्रत्युपधा
यकत्वादिति। तन्न एवं सति व्यधिकरणव्याप्तिज्ञानस्यापि कालोपाधिविधया परामर्शोपधाय
कत्वेन स्वव्यधिकरणानुमितिफलोपहितकरणत्वप्रसंगेन विशेषणज्ञानत्वेन स्वजन्यपरामर्श
स्यैव प्रत्यासत्ति तया ईश्वरीयव्याप्तिज्ञानस्यानुमितिफलोपहितकरणत्वस्यासंभवात्॥ न च ये ४

नकेनापिसंवंधेनफलोपहितत्वेपिनित्यस्येत्यादिव्याप्तेरवाधएवेतिवाच्यं॥स्वरूपयोग्यताघटकसं
वंधेनफलोपधानस्यैवव्याप्तौनिवेशात्॥अन्यथाकपालादेर्ईश्वरत्वरूपेणजनकत्वेप्याकाशादेः
संयोगादिसंवंधेनघटाद्यात्मकफलसंवंधसंभवात्एतद्व्याप्त्युपादानस्यैवनिष्प्रयोजकत्वात्॥फ
लायोगव्यवछिन्नकारणत्वंकरणत्वंतादृशमनुमितिकरणंचपरामर्शस्तस्यकारणतायांच
सामानाधिकरण्यंप्रत्यासत्तिःफलोपहितकरणत्वमेवनिरूप्यंअतएववक्ष्यतिफलोपहित
स्यलक्षत्वमेवेति॥तथाचेश्वरज्ञानस्यफलसामानाधिकरण्यविरहेणतादृशफलोपहितक
रणत्वाभावादित्यर्थइतितुकश्चित्॥अनुमितिकरणत्वावछेदनप्रत्यक्षोपजीवकत्वंव्यव
स्छाप्यप्रत्यक्षकरणत्वावछेदेनानुमानोपजीवकत्वस्यव्यतिरेकमाह॥सर्वेपुनरिति॥ननु
व्याप्तिज्ञानत्वेनैवानुमितिकरणताअनित्यवन्नित्यप्यदृष्टादिरूपसहकारिविरहेणफलव्य
तिरेकसंभवात्नित्यस्येतिव्याप्तेरप्रयोजकत्वादतआह॥दृष्टद्वारेति॥तथाचकरणतावछे
दकधर्मसामानाधिकरण्येनस्वजनकादृष्टाजनकेंद्रियजन्यत्वमेवानुमानेअनंतर्याभिधा

ननियामकमितिभावः॥इंद्रियत्वसामानाधिकरण्येनस्वजनकादृष्टाजनकानुमानजन्यत्वंनास्तीत्य
तआह॥नचोक्तमितिमदपीति॥अपिनाकरणतावच्छेदकसामानाधिकरण्यसूचितं॥नचयत्रचक्षुघ
र्षणानंतरंचक्षुरंतरोत्पादस्तत्रघर्षणजनकप्रवृत्तिजनकस्यादृष्टाद्वारकस्यकृतिसातानुमानस्यो
पजीवकमेवचक्षुरंतरंतमेवमोषधपानानंतरंप्रकृष्टचक्षुरुत्पादेपीतिवाच्यं॥तत्रघर्षणजनका
नुमानस्यौषधपानजनकानुमानस्यचप्रयोजकत्वेनजनकत्वाभावादिति॥नचैवंअदृष्टाद्वा
रकत्वंव्यर्थंअदृष्टद्वारकत्वंमर्थंअदृष्टद्वारकानुमानस्येंद्रियजनकत्वाभावादितिवाच्यं॥ई
श्वरज्ञानस्यापोतत्कल्पेनुमितिकरणतयातद्वारणायैवतदुपादानादिति॥अदृष्टद्वारकोपजी
वकत्वस्योभयसत्वान्नविनिगमकत्वमितिभावः॥नवियमइति॥तथाचोपजीवकत्वादितिहेतुपं
चमनुपपन्नेतिभावः॥क्वचित्कार्यंनिरूप्यापीति॥तथात्रैवानुमितिनिरूपणानंतरंतत्करणनिरूप
णमितिभावः॥तत्तज्ज्ञानजन्यजिज्ञासाप्रयोजकत्वंपंचम्यर्थोनतुज्ञानज्ञाप्यत्वमित्याशयेनाह॥किंचातेति॥
ताहृशानियमाभावेकिमनिष्टमित्यर्थः॥नन्वनंतरोऽभिधानाव्याप्यत्वेतस्यसंगतित्वमनुपपन्नंअनं ५

तरान्निधानंव्याप्यत्वस्यैवतद्घटकत्वादतआह॥ नहीतिलक्षणपर्यालोचनयानंतराभिधानाव्याप्यत्वंद
र्शयितुंलतत्स्वरूपमाह॥ अनंतर्येति॥ अनंतर्याभिधानप्रयोजिकायाजिज्ञासातज्जनकंयज्ज्ञानंतद्विष
यइत्यर्थः॥ जिज्ञासाजनकज्ञानविषयेघटादावृत्तिव्याप्तिवारणायप्रयोजकांतं॥ प्रत्यक्षस्यकरणत्व
ज्ञानेकरणस्यकार्यमावश्यकमितिक्रमेणकार्यत्वरूपेणकार्यसामान्यज्ञानंततःसामान्यधर्मप्रका
रकज्ञानस्यविशेषधर्मप्रकारकजिज्ञासाजनकत्वात्किमस्यकार्यमित्याकारिकाशिष्यजिज्ञासा
ततःशिष्यस्यकिमस्यकार्यमितिशब्दप्रयोगःततःशिष्यजिज्ञासाज्ञानंगुरोस्ततइष्टसाधनताज्ञानेनानं
तराभिधानमितिक्रमेणजिज्ञासायाअनंतराभिधानप्रयोजकत्वंनन्वज्ञानगोचरेच्छाजिज्ञासातत्र
चज्ञानेइष्टसाधनताज्ञानंहेतुरितितद्विषयेइष्टसाधनत्वेतिव्याप्तिरितिवाच्यं॥ तादृशजिज्ञासाप्र
तिसमानविशेष्यकत्वंप्रत्यासत्त्यनवच्छिन्नायांजनकतातदवच्छेदकंयत्प्रकारकंज्ञानंतत्त्वंतत्व
स्याक्षत्वात्इष्ट साधनताज्ञानस्यहेतुतायांसमानविशेष्यकत्वंप्रत्यासत्तिःनतुकार्यत्वप्रकारक
ज्ञानत्वेनकार्यत्वावांतरधर्मप्रकारकजिज्ञासात्वावच्छिन्नंप्रतिहेतुतायां॥ कार्यत्वेनवस्तुगत्या

घटज्ञानेपिकार्यत्वावांतरधर्मप्रकारकज्ञानेएवेच्छोदयात्॥ अवच्छेदकत्वंचतत्पर्याप्तिअधिकरणत्वं
तेनकार्यत्वघटकैकदेशज्ञाननिरासः॥ एतज्ज्ञानाभावेच्छाकर्षपदंपत्प्रकारेत्यभिधानाच्च नकार्य्यादौधर्मिण्य
तिव्याप्तिरिति॥ यत्तुतादृशजिज्ञासात्वव्याप्यधर्मावच्छिन्नकार्यताप्रतियोगिककारणतायांपत्प्रका
रकज्ञानत्वमवच्छेदकंतत्त्वमर्थः॥ उपायेच्छात्वावच्छिन्नंप्रत्येवेष्टसाधनत्वज्ञानस्यहेतुत्वादुपाये
च्छात्वस्यघटेच्छादिसाधारण्येनतादृशजिज्ञासात्वव्याप्यत्वाभावादिति॥ तन्नकार्यत्वावांतरधर्मप्र
कारकजिज्ञासात्वादीनां अनंतर्याभिधानप्रयोजकजिज्ञासात्वव्याप्यत्वाभावात्॥ तादृशकार्यका
रणभावमादायप्रकृतलक्षणासंभवात्॥ तद्व्यक्तित्वावच्छिन्नकार्यतायांचतद्व्यक्तित्वस्यैवावच्छे
दकतयाकार्यत्वप्रकारकज्ञानत्वस्यानवच्छेदकत्वात्॥ यद्येष्टसाधनत्वंकार्यकारणभावात्मक
तयासंगतिरेवेतिनतत्रातिव्याप्तिर्दोषायेति॥ तत्तुच्छं॥ प्रत्यक्षानुमानयोः कार्यकारणभावोदित
योःसंगतिर्नत्विष्टसाधनत्वंतथाचयदनंतरंयदभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयोपःसन
योसंगतिः॥ एवंरूपोप्रत्यक्षानुमानसंगतिलक्षणेइष्टसाधनत्वे॥ तिव्याप्तेरपरिहरात्॥ यद्धर्मव्याप्यध ६

र्मप्रकारकज्ञानेष्टसाधनताज्ञानमानंतर्यान्निधानप्रयोजनप्रयोजकजिज्ञासाजनकंसधर्मः संगतिः
अतएवमान्यप्रकारकज्ञानस्यस्वांतत्र्येणविशेषधर्मप्रकारकाजिज्ञासांप्रतिजनकत्वाभावेपिनक्ष
तिः॥ नवाइष्टसाधनत्वेप्यतिव्याप्तिरिति केचित्॥ अत्रवदंतिगेहेघटोस्तीत्यन्निधानानंतरंघटत्वसामान्य
ज्ञानात्कोघटइतिजिज्ञासायांकंवुग्रीवादिमान्पटइत्यनंतरान्निधानप्रयोजकजिज्ञासाजनकज्ञानवि
षयेघटत्वेतिव्याप्तिः॥ एवमाधारत्वज्ञानानंतरंअधेयत्वसामान्यज्ञानात्तुकिमस्याधेयमितिजिज्ञासा
णमाधेयस्यानंतरान्निधानादाधेयत्वादाविति॥ अत्रब्रूमः गेहेघटोस्तीतिघटत्वादिकंसंगतिरेवउपो
द्धातमध्येनिवेशात्॥ तथाहिचिंतांप्रकृतसिध्यर्थामुपोध्धातंविदुर्बुधाइत्येनेनप्रकृतसिध्यनुकूलचिं
ताकालावच्छिन्नप्रकृतानुकूलत्वमुपोध्धातः॥ प्रकृतंचतत्रतत्रविशेष्योपादेयंअनुकूलत्वंचक
श्चिद्घटकत्वंकश्चिदुपस्थापकत्वंकश्चित्ज्ञापकत्वमित्यादिक्रमेणबोध्यं॥ घटकत्वंचयथाव्याप्तिवि
शिष्टपक्षधर्मताज्ञानजन्यंज्ञानमित्यत्राज्ञातव्याप्तिकस्यव्याप्तिपदवाच्यत्वेनज्ञानेकाव्याप्तिरित्याका
रिकायांजिज्ञासायांव्याप्तिनिरूपणमेवमिंद्रियासंनिकृष्टपर्वतीयधूमेव्याप्तिविशिष्टधीर्नतदुपस्थापकं

विनेतितद्रूपस्यापकंविमित्याकांक्षायांसामान्यलक्षणानिरूपणमेवंविशिष्टज्ञानस्यानुमितिहेतुत्वेकिं
ज्ञापकमित्याकांक्षायांपरामर्शस्यानुमितिहेतुत्वव्यवस्थापनमितिनत्रतत्रोपोद्घातपदप्रयोगाःप्रकृ
तेचाज्ञानघटपदार्थस्यघटोस्तीत्यतोघटपदवाच्यत्वेनज्ञानेकोघटपदवाच्यइतिजिज्ञासायांकंबु
ग्रीवादिमान्घटइत्यादिक्रमेणनिरूपणेप्रकृतघटास्तित्वसिध्यानुकूलचिंताकालीनस्यघटस्ति
त्वघटास्तित्वघटकघटत्वस्योपोद्घातत्वसंभवात्॥एवमाधेयत्वादिकमपिप्रसंगमध्येनिवेश्यते
आधारप्रसंगेनसटतस्याधेयस्यानुपेक्षणीयत्वज्ञानेतज्जिज्ञासोदयात्॥केचित्तुगेहेघटोस्तीत्या
दौघटपदवाच्यत्वंआधेयत्वादिकंप्रसंगएव॥अनुपेक्षणीयत्वंउपेक्षानर्हत्वावच्छेदकधर्मव
त्वंस्वधर्मोघटपदवाच्यत्वाधेयत्वादिः॥नक्तरूपेणैवतदनुगमान्नाधिक्यमित्याहुः॥तत्रस्मृति
कालावच्छेदेनोपेक्षानर्हत्वंप्रसंगः॥अत्रचस्मृतिकालावच्छेदःस्वरूपसन्निविष्टांशःज्ञातोपयोगी
स्मृतिरनुपेक्षणीयताचाभिधातुरेवस्वयंस्मृतायांजिज्ञासानुदयात्॥स्वीयानुपेक्षणीयत्वज्ञान
स्यजिज्ञासाजनकत्वाभावाच्च॥केचित्तुश्रोतुरेवस्मृतिरनुपेक्षणीयताचवक्तुअस्मिन्पक्षेवक्तुर ७

पेक्षा न भविष्यतीति प्रतिसंधाय श्रोतुर्जिज्ञासोदयादित्याहुः एवं प्रकृतसिध्यनुकूलचिंताकालावच्छे
देन प्रकृतानुकूलत्वमुपोद्घातः ॥ चिंतां वक्तुमाह ॥ अत्रापि तादृशकालावच्छेदः स्वरूपसन्नुपोद्घा
तपदनियामकः इतरांशः ज्ञातोपयोगी एवं प्रतिबंधकशिष्यजिज्ञानिवृत्तौ अवश्यवक्तव्यत्वमवस
रः अपि त्रानिश्चत्यंशः स्वरूपसन्नितरांशः ज्ञातोपयोगी यथाऽनुमाननिरूपणानंतरं तादृशजिज्ञासा
निवृत्तौ अवश्यवक्तव्यत्वज्ञानात् ॥ किंयुक्तव्यमिति श्रोतुर्जिज्ञासानंतरं उपमाननिरूपणमिति ॥ जिज्ञा
सितार्थसिध्यत्वमवसर इति कश्चित् ॥ तस्यापि पूर्वोक्त एव पर्यवसानं भवति दिजिज्ञासाविषयसिध्यते
इदं ज्ञातमन्यत्किं दक्तव्यमिति जिज्ञासा ॥ निर्वाहकत्वमेककार्यनिर्वाहकत्वं तच्च प्रयोजकत्वं कारणकारण
तावच्छेदकसाधारणं यथा व्याप्तिपक्षधर्मयोरनुमित्यजनकत्वेपि तज्जनकीभूतज्ञानवच्छेदक
त्वेनैव कार्यानुकूलत्वं ॥ तत्र सामान्यतोनुमितिलक्षणैककार्यानुकूलत्वज्ञाने किं तदनुकूलमि
ति जिज्ञासायामनंतरं पक्षधर्मतानिरूपणमिति ॥ एककार्यत्वं एकस्य कार्यताप्रयोज्यतासाव
ज्यनताज्यन्यज्ञानविषयता च यथा ईश्वरशक्त्योरनुमानाजन्यत्वेपि तज्जन्यज्ञानविषयत्वलक्ष

णैककार्यत्वसंगत्या ईश्वरवादानंतरंमीमांसकेनशक्तिराशंकितानेदंव्यापिकेनईश्वरसिध्यनंतरंश
क्तिंनिरस्यपरमप्रयोजनंत्वनुमानस्यापवर्गइत्यनेनेश्वरसिध्यपवर्गयोरनुमानजन्यत्वलक्षणैक
कार्यत्वसंगतिःसूचिता॥सामान्यतःअनेककार्यत्वज्ञानेकिमस्यकार्यमितिजिज्ञासायांविशि
ष्टकार्यंतिरान्निधानेनसामान्यलक्षणसंभवात्॥यत्तुनिर्वाहकत्वमुपपादकत्वमिति॥तन्नउपपा
दकत्वंनज्ञानपकत्वंघटकत्वंवाउपोद्घातेनगतार्थत्वात्॥नकारणत्वंहेतुतयागतार्थत्वात्तदेवं
सर्वत्रोहनीयं॥अत्रचविभिन्नतात्पर्यकेसंगतिव्यवहाराभावात्एकवाक्यतायन्नत्वंसामान्य
लक्षणेविशेषलक्षणेचदेयं॥अत्रचतादृशजिज्ञासायोग्यत्वस्यातिप्रसक्तत्वात्॥फलोपधान
स्यचसर्वत्रासंभवान्न॥प्रसंगाद्यन्यतमत्वंतत्वमितिध्येयं॥जायतेचेति॥कार्येज्ञातेकार्यंसकार
णमितिरीत्याकारणत्वस्यज्ञानात्किमस्यकारणमितिजिज्ञासाकारणेज्ञातेकारणंसकार्यकमि
तिरीत्याकार्यत्वस्यज्ञानात्किमस्यकार्यमितिजिज्ञासेत्यर्थः॥द्वयोरेवेति॥तथाचसंगतेरनंतराभिधा
नव्याप्यत्वंसुतरामसंभवितादृत्रावादिमतेपिकारणेव्यभिचारादितिभावः॥इत्थंचसंगतेरनंतरा ८

न्निधानव्याप्यत्वं अतरामसंभविता ह्त्रावादिमतेपि कारणे व्यभिचारादिति भावः॥ इत्थंच संगतेर
नंतराभिधानाव्याप्यत्वे च॥ एवंचोपजीवकत्वादिति पंचमी न हेतुतायां किंतु ज्ञानजन्यजिज्ञासाप्रयो
ज्यतायामिति भावः॥ लघवादत्रैवेति॥ यद्यप्युपमान एव संगतिप्रदर्शने तादृशाशङ्कै नैवाभिधातुं
शक्यत्वान्नशावलाघवं तथापि प्रकरणलाघवायेत्यर्थः॥ प्रकरणं च संगतिप्रदर्शनप्रयोजि
काकांक्षा॥ प्रत्यक्षानंतरमुपमानात्प्रागभिधाने किं नियामकमिति जिज्ञासायाः॥ औत्सर्गि
कत्वेन तामनादृत्य उपमानग्रंथेतत्संगतिप्रदर्शने आकांक्षांतरकल्पने गौरवमिति भावः॥
ननु बहुवादिसंमतत्वं न संगतिरत आह॥ अप्रसिध्धतयेत्यादि॥ अनुमानस्याप्रसिध्धत्वे
न सामान्यधर्मप्रकारकज्ञाने विशेषधर्मप्रकारकजिज्ञासासंभवादिति भावः॥ अप्रसिध्धत
येत्यत्र हेतुः निरसनीयेति॥ निरसनीयाल्पवादिविप्रतिपत्तिर्यत्र त्वेनेत्यर्थः॥ दुरूहत्वेन बल
वदनिष्टसाधनत्वज्ञानात् कदाचिच्छाप्रतिबंधः स्यात् अतः अबोधत्वप्रथमजिज्ञास्याप्रयोगिदु
रूहत्वे हेतुर्निरसनीयवत्तुवादीति॥ ननु अगमस्य स्वयमप्युहयितुं शक्यत्वादिति न्यायेन अग

मप्रेक्ष्यदुरूहेऽपिकस्यचित्जिज्ञासाप्रथमंस्यादत्येवेत्यत आह॥औत्सर्गिकीमिति॥ननुप्रतिबंधकी
भूतायाजिज्ञासायानिवृत्तिःप्रतिबंधकाभावांतरवत्॥स्वरूपसतीहेतुर्नतुज्ञानामानाभावादत आह॥
यथाचेति॥अकरेपंचमतत्वबोधादौप्रतिबंधकजिज्ञासानिवृत्तौसत्यामवस्यवक्तव्यत्वमवसरः॥
वक्तव्यत्वज्ञानादेवजिज्ञासेतिलक्षणाव्याभिरतएवग्रंथशेषेवसरसंगत्यभावसूचनायप्राचामि
तिग्रंथस्यविरम्यतकइतिशब्दस्यवाउपनिबंधः॥शब्दांतरेति॥उपमितिविषयीभूतगवयपदाति
रिक्तगोसदृशपदादिशक्तिग्राहकमित्यर्थः॥शब्दांतरसमयग्राहकं॥अनुमानंकेवलमतिदेशवा
क्यार्थस्मृतिरूपव्यापारमात्रोपधानेउपयोगिनन्तूपमितौतत्रगोसादृश्यादीनामविषत्वात्॥अत
उपमितिविषयीभूतगवयपदप्रवृत्तिनिमित्तत्वबोधकमनुमानउपजीव्यत्वेनदर्शयति॥सप्रवृत्ती
ति॥समानवित्तिवेद्यतयागवयपदप्रवृत्तिनिमित्तत्वविषयकंगवयपदंसप्रवृत्तिनिमित्तकंसाधु
पदत्वात्इत्याकारकमित्यर्थः॥गवयोगवयपदप्रवृत्तिनिमित्तवानित्युपमितौगवयपदप्रवृ
त्तिनिमित्तस्यविशेषणतयातद्ग्राहकस्योपजीवत्वादितिभावः॥इदंचचिंतामणिकारमतेआचा ९

र्यमतेत्तुगवयपदवाच्यइत्येवोपमितिस्वीकारादीतिध्येयं॥ अत्रउपमितावयंक्रमः॥ अगृहीतगव
यपदशक्तिकस्यकीदृग्गवयपदवाच्यइतिप्रश्नानंतरंगोसदृशोगवयपदवाच्यइत्याकार
कमतिदेशवाक्यार्थज्ञानंततःसादृस्यविशिष्टदर्शनंतदेवकरणंततोअतिदेशवाक्यार्थस्मृ
तिःसैवव्यापारःततोगवयोगवयपदवाच्यइत्युपमितिरितिनन्वेतावताउपमितिंप्रत्युपजीव्यत्व
मादीशातंनतूपमानस्वरूपंप्रत्यक्षमित्यतआह॥ अंततइति॥ उपमितिकरणस्यापिकार्यत्वेनाद्यज
न्यत्वातजनकप्रवृत्त्योपपादिकानुमानसापेक्षमेवोपमानमित्यर्थः॥ अयंगवयपदवाच्यगव
यसंयोगादित्यनुमानव्यक्तिविशेषस्यापिगवयोगवयपदवाच्यइत्युपमानोपजीवकत्वा
दाह॥ निखिलमेवेति॥ तत्रानुमानत्वावच्छेदेननोपजीवकतेतिनदोषइति॥ केचिदित्यस्वर
सर्ववीजंतुबहुवादिसंमतत्वादितिमूलेतादृशसंगतेरप्रदर्शनात्ग्रंथासंदर्भः॥ ननुसंगतेरनिया
मकत्वा॥ नशाब्दिधानिकिंनियामकआह॥ संभवतिचेति॥ एवंचनिरूपणयोःकार्यकारणभावःसंग
तिमुद्रयानोक्तइतिनदोषइति॥ निरूप्यत्वेपिनिरूपणयोरपिकार्यकारणभावोयथाकथंचि

जिज्ञासाजनकद्वारासंगतिरेवेत्यपिंकश्चित्॥इहप्रत्यक्षानुमानस्थलेनिरूपणयोः प्रत्यक्षज्ञानानु
मानज्ञानयोः॥एवंचप्रत्यक्षपूर्वकत्वेनानुमानज्ञानजननार्थंप्रत्यक्षज्ञानस्यप्रथममपेक्षितत्वादादौ
प्रत्यक्षमभिहितमितिभावः॥निरूपकयोः॥ज्ञानजनकत्वाद्द्वयोःकार्यकारणभावः॥प्रयोज्यप्रयोजक
भावइत्यर्थइत्यपिकश्चित्॥अथतत्पूर्वकंत्रिविधमनुमानंपूर्ववत्शेषवत्॥सामान्यतोदृष्टंचेति
सूत्रं॥अथप्रत्यक्षलक्षणानंतरंअनुमानमुच्यतइतिशेषः॥त्रैविध्यंदर्शयति॥पूर्ववदित्यादिना
॥पूर्वंकारणंतल्लिंगकंयथानंततंतुसंयोगेनमहापटानुमानंशेषकार्यंतल्लिंगकंयथानद्युपदेश
वृष्टिमतीविशिष्टप्रवाहवत्वादिति॥सामान्यतोकार्यकारणभिन्नलिंगकंयथाइच्छाद्रव्याश्रितागु
णत्वादिति॥यद्वापूर्वमन्वयि॥शेषंव्यतिरेकिसामान्यतःसामान्येनान्वयव्यतिरेकसाधारणसह
चारेणगृहीतं॥एवंचकेवलान्वयिसाध्यकंकेवलव्यतिरेकिसाध्यकंअन्वयव्यतिरेकिसाध्यक
मित्यर्थः॥अत्रचानुमानंअनुमितिःकारणलिंगिकेत्येवंव्याख्येयं॥सूत्रेयत्तदित्यध्याहृत्यतादृ
शानुमितिर्यातदनुमानमितिरीत्याअनुमितिकरणस्यापिलक्षणंलब्धं॥फलायोगव्यवच्छिन्नंकारणं १०

करणमिति मतेतत्तृतियलिंगपरामर्ष एवानुमानमित्यनुमानपदं यथाश्रुतार्थमेवयतदित्यपिनाध्या
हर्तव्यमिति॥ व्याप्तीत्यादिनासाध्यसाधनतंत्सहचारपक्षादिपरिग्रहः॥ अत्रतत्सर्वकमितितत्पदेनेंद्रि
यार्थमेवयतदित्यपिनाध्याहर्तव्यमिति॥ व्याप्तीत्यादिनासाध्यसाधनतंत्सहचारपक्षादिपरिग्रहः
॥ अत्रतत्सर्वकमितितत्पदेनेंद्रियार्थसन्निकर्षोत्पन्नज्ञानमित्यादिपूर्वसूत्रेणप्रक्रांतस्यपरामर्षस्तेन
न स्वरूपणयोः फलनिरूपणयोः कार्यकारणभावावगमः॥ अन्यथाप्रत्यक्षफलनिरूपणानुमिति
निरूपणयोरेवापजीव्योपजीवकभावलाभात्तेनासंगतिःस्यादितिध्येयं॥ नन्वेमपिसोत्रक्रमो
पपादनेपिअत्रत्यक्रमोनोपपादितइत्यतध्याह॥ अत्रपीति॥ अत्रापि अनुमानखंडेपि॥ सहन्वा
रप्रत्यक्षेति॥ यद्यपिव्यभिचारज्ञानविरहन्वारदर्शनंव्याप्तिग्राहकंइत्युक्तं तत्रचप्रत्यक्षं विशेष्य
मितिकथं तंन्निरूपणस्यहेतुत्वं॥ तथापिप्रत्यक्षमप्रतिपाद्यप्रत्यक्षंव्याप्तिग्राहकमितिबोधमित्युप
रोनज्ञाक्यंतेतत्रापिप्रत्यनिरूपणहेतुरितिबोध्यं॥ अत्रापिप्रत्यक्षखंडेइंद्रियत्वेनइंद्रियत्वेनइंद्रियज
न्यंज्ञानप्रत्यक्षमितिलक्षणकरणात्॥ करणनिरूपणयोः कार्यकारणभावावगमः॥ तस्य॥ तेनरूपे

णानुमाननिरूपणस्य॥अनुमानोपमानयोरपिक्रमनियामकमाह॥एवमिति॥अनुमानस्योपमानांतर्गत्व
तमप्रसक्ततयाननिराकृतंउपमानस्यचानुमानांतर्गतत्वंप्रसक्तंएकदेशिनाअनुमानेनैवोपमानकार्या
न्यथासिध्युपगमात्अतउपमानस्यंअनुमानभिंन्नत्वेनोपमानंनिरूपितमित्तिदर्थमनुमानंप्राकनि
रूपितमितिभावः॥ननुअनुमानलक्षणेकर्तव्येनुमितिकिमर्थंलक्षितेत्यतआह॥लक्षणस्वरूपेतिल
क्षणंतत्करणमित्यादिना॥स्वरूपंतत्वेत्यादिना॥प्रमाण्यमथानुमानं
नप्रमापामित्यादिनानिरूपितं॥आदिनातत्त्वानुमानंत्रिविधमितिविभागादिसंग्रहः॥एवसर्वेषुअनुमि
तेर्विशेषणत्वदितिभावः॥प्रामाण्यादिभिरितितृतियाप्रकारतायां॥निरूपणेशाब्दःतथाश्चलक्षणस्व
रूपप्रमाण्यादिप्रकारकशाब्दविषयेऽनुमानेविशेषणत्वेनानुप्रविष्टाद्यमनुमितिरित्यर्थात्॥नप्रथ
मांतान्वयविरोधः॥तथाऽधारसप्तमीस्वविषयकनिरूपणप्रकारकत्वश्चसंबंधः॥प्रकारत्वंविष
यित्वंचव्यापारानुवधितयावोध्यं॥अनुमानेनिरूपणीयेत्यतिसप्तम्याःअनुमाननिरूपणेकर्तव्य
त्यर्थइतिकश्चित्॥अनुमानेनिरूपणीयेअनुमाननिरूपणेकर्तव्यइत्यर्थइतिकश्चित्तु॥अनु ११

मानेनिरूपणीयेअनुमाननिरूपणार्थंतथाचनिमित्तसप्तमी॥अनुमानस्यविशेष्यतयानिरूपणस्यचविशेषण
तयाप्यर्थवाक्येनबोधितत्वात्॥अनुमाननिरूपणइतिपरामर्षस्यासंभवात्॥विशेषणस्यनिरूपणस्यनिमित्त
तयाविशिष्टेनिमित्तत्वस्यविवक्षितत्वात्॥तथोक्तमित्यन्ये॥अत्रोभयत्रप्यनुमितिनिरूप्यतइतिन्वयः॥ननु
भवतुसर्वत्रानुमितेरनुप्रवेशोअनुमितिघटितमेवानुमानलक्षणंकिमितिकृतंअन्यथापितल्लक्षणसंभवा
दतआह॥करणस्येति॥अत्रमूर्तिःकरत्वंणतत्वक्रियाभेदेनभिन्नंभेदोवैजात्यं॥तथाचप्रत्यक्षादिकरणतोऽ
नुमितिकरणतायाविभिन्नत्वमेवप्रत्यक्षानुमानयोर्विभिन्नप्रमाणत्वेव्याप्तिशाद्वोभयविषयकस्यैकस्य
स्मरणस्याभिन्नत्वेपिशाद्वानुमानत्वेनपृथक्प्रमाणव्यवहारात्तथाचप्रत्यक्षादिप्रमितितोऽनुमितौवैलक्ष
णज्ञानार्थंअनुमितिलक्षणमितिभावः॥अत्रक्रियालक्षणवाक्ये॥कर्मधारयोत्तरेति॥ननुभावप्रत्ययस्य
कुत्रशक्तिःसामानाधिकरंण्यत्वेनतत्पदार्थतावच्छेदकसमानाधिकरणत्वात्वेनवा॥आद्येनीलत्वप्रलत्व
योःसामानाधिकरण्यत्वेनतत्पदार्थतावच्छेदकसमानाधिकरणत्वेनवा॥आद्येनीलत्वोत्पलत्वयोःसामा
नाधिकरण्यालाभः॥तयोःपदार्थतावच्छेदकत्वेनसामानाधिकरण्येऽनन्वयात्॥नचततत्पदेनीलत्वोत्पल

त्वयोरेवलक्षणागौरवात्॥नीलत्वोत्पलत्वयोरभेदस्यबाधितत्वात्नीलोत्पलपदान्नीलोत्पलानुभवापला
पाच्च॥द्वितीयेनीलोत्पलोपंनीलत्वोत्पलत्वसामानाधिकरण्यमित्येवंरीत्याप्रत्ययार्थेतादृशसामानाधि
करण्येऽवच्छेदकतासंबंधेनप्रकृत्यर्थस्यनीलोत्पलस्यान्वयोपपादनेनैकदेशान्वयाभावेप्यनंतशक्ति
कल्पनापत्तिः॥एवंघटत्वादौप्रकृत्यर्थतावच्छेदकधर्मस्यप्रतिपादनंनीलोत्पलत्वमित्यत्रतादृशसामा
नाधिकरण्यस्येतिव्युत्पत्तिभेदकल्पनमपीति॥अत्रवदंती॥घटत्वमित्यादौक्रमशःशक्तेरेवप्रकृतेतादृशसा
मानाधिकरण्यलाभः॥तत्रहिघटेतरावृत्तित्वेसतिसकलघटावृत्तित्वेनप्रकारेणघटत्वमुपस्थाप्यते॥तत्रप्र
कृतितएवघटस्यलाभः॥इतरावृत्तित्वादौभावप्रत्ययस्यशक्तिः॥तत्रापिइतरतवृत्तित्वमभावःसाकल्यंवृत्ति
मत्त्वविशेषकलितमित्यर्थः॥इतरवृत्तित्वप्रतियोगिकाभावस्यातिप्रसक्तत्वात्॥इतरवृत्तित्वत्वावच्छिन्नाभा
वस्याप्रसिध्धत्वात्॥घटत्वादौतद्बाधाच्च॥विशिष्टस्यशक्यत्वासंभवात्॥व्युत्पत्तिवैचित्र्याच्चएकपदोपा
त्तानामपितावतांपरस्परोपश्लेषेणबोधः॥तत्रचप्रकृतिजन्यबोधीयेनसंबंधेनतत्प्रतिपाद्यतावच्छेदक
कधर्मेनस्यप्रकारतातेनसंबंधेनइतरावृत्तित्वंतत्रइतिमतंचार्थः॥तेनघटेतरस्मिन्कालादौकालिकसंबं १२

धेनघटत्वस्यवृत्तावपिनक्षतिः॥नवाघटत्वमित्यादौकंवुग्रीवादिमत्त्वादेर्भानं॥नीलोत्पलत्वमित्यादौचनीला
भिन्नत्वमुत्पलंप्रकृत्यर्थः॥तत्रप्रकृत्यर्थतावच्छेदकनीलाभिन्नोत्पलत्वं॥तच्चनीलत्वसमवाय्यभिन्नसमवे
तोत्पलत्वंतस्यचोपाधितयास्वरूपसंवंधेनैवप्रकृतिजन्यवोधप्रकारतातेनसंवंधेनचतद्वृत्त्यभिधानेच
सामानाधिकरण्यस्यापिभानं॥अभेदांशस्याधिक्यभानेपिनीलत्वसमवायिसमवायस्यापिभानादिति॥
प्रमेयत्वमित्यादौचेतरांशेननासत्तेअप्रसिध्यत्वात्॥किंतुसकलप्रमेयवृत्तित्वंनचगुणान्यत्वविशिष्टसत्व
मित्यादौविशिष्टस्यानतिरेकतयातदितरासमवेतत्वस्यमहत्त्वमित्यादौचसकलमहद्वृत्तित्वस्यमहत्परिमाणे
वाधादनन्वयप्रसंगइतिवाच्यं॥तदितरत्वव्यापकात्यंताभावप्रतियोगितावच्छेदकतद्वृत्त्यंताभावप्रतियोगि
तानवच्छेदकधर्मवत्त्वस्यैवतदुभयपदेनविवक्षितत्वात्॥तदितरत्वव्यापकेतिकरणाच्च॥घटत्वमित्यादौनद्रव्यत्वा
देर्भानमिति॥अत्रनव्याःएवंसतिएकत्वमित्यादौपरिमाणादेःकथंनलाभः॥नचप्रकृत्यर्थतावच्छेदकनिरू
पितत्वविशिष्टसंवंधेनैवतरावृत्तित्वंतद्वृत्तित्वंतद्वृत्तित्वंचप्रतीयते॥तत्रएकत्वनिरूपितसमवायेनपरिमाणा
दिकमवृत्तितिनतत्रलाभमितिवाच्यं॥एवंसत्यनंतशक्तिकल्पनावश्यकत्वेपटत्वादिषुप्रातिस्विकरूपेणैवश

क्तिरक्तकिमितराद्वृत्तित्वादिगौरवमदिष्टुतवा॥यद्वा धर्मित्वेनैव शक्तिरक्तप्रकृत्यर्थतावच्छेदकनिरूपित
त्वविशिष्टसंवंधेन तत्र प्रकृत्यर्थस्यान्वयः॥तेन घटत्वमित्यादौ न द्रव्यत्वादेर्वोधः॥अतएव गुणकिरणाव
ल्यां पृथक्त्वमित्यादौ प्रकृत्यर्थतावच्छेदकावच्छेदेनैव गुणात्भावप्रत्ययः प्रतिपादयति प्रतितिस्तुताद्
रूप्येण धर्मत्वेन वेत्यन्यदेतदिति दीधितिकृतः विशेष्यशक्तौ च नीलत्वोत्पलत्वसामानाधिकरण्यं प्रकृते भा
वप्रत्ययार्थः॥नीलोत्पलस्य प्रकृत्यर्थस्य ताद्रूप्यसामानाधिकरण्येऽवच्छेदकत्वेनान्वयः॥घटपटत्वमि
त्यत्र द्वंद्वोत्तरस्येव नीलोत्पलत्वमित्यत्र कर्मधारयोत्तरस्यापि भावप्रत्ययस्य सामान्यशक्त्योपस्थितयोः नी
लत्वोत्पलत्वयोः कर्मधारयोत्तरभावप्रत्ययत्वावच्छिन्नया विशेषशक्त्योपस्थिते सामानाधिकरण्ये विशे
षणत्वेनान्वयः॥नीलाभिन्नोत्पलस्य च प्रकृत्यर्थस्याधेयत्वसंवंधेन नीलत्वोत्पलत्वयोरवच्छेदकत्वसं
वंधत्वेन तत्सामानाधिकरण्ये विशेषणत्वेनान्वयः॥नीलाभिन्नोत्पलस्य च प्रकृत्यर्थस्याधेयत्वसंवंधेना
नीलत्वोत्पलत्वयोरवच्छेदकत्वसंवंधत्वेन तत्सामानाधिकरण्ये चान्वय इत्यपि केचित्॥वाधितेति॥वाधि
तावाधितताद्रूप्यसामानाधिकरण्यविषयकेत्यर्थः॥ज्ञातानुमितीति॥भ्रांतं भ्रमः न च तद्देशो वन्हिमानि १३

त्यादो व्याप्तिविशिष्टत्वतद्दवृत्तित्वसामानाधिकरण्याप्रसिध्धकथंतत्ज्ञानलाभइतिवाच्यं॥तत्रतद्दवृत्तित्वेव्या
प्तिविशिष्टत्वसामानाधिकरण्यावगाहिज्ञानमेवतदुभयसामानाधिकरण्यज्ञानपदार्थइत्याशयात्॥अ
तएवानेनैवदोषेणेदंनिराकरिष्यति॥केचित्तुपर्वतोवन्हिमान्धूलीपटलादित्यादौ व्याप्तेविशिष्टत्वपर्वत
वृत्तित्वसामानाधिकरण्यंयदालोकादौप्रसिध्धंतस्यधूलिपटलेआरोपात्तद्यथार्थानुमितिस्तत्रनाव्याप्तिरित्य
र्थः॥भ्रांतानुमितीतिभ्रांतस्यानुमितिःभ्रमजन्ययथार्थानुमितिरित्यर्थइत्याहुः॥तत्संदर्भविरोधात्॥उपेक्षितं॥
नियमतइति॥यत्रवन्हिव्याप्यवान्वन्हिव्याप्तिविशिष्टपर्वतवृत्तिधूमवांश्चपर्वतइत्याकारकःपरामर्शस्तत्रत
त्संभवेपियत्रवन्हिव्याप्यवानित्येवपरामर्शस्तत्रतदभावादित्यर्थः॥ननुतेनरूपेणहेतुत्वग्राहकाभावात्तत्रतादृ
शाबोधाभावस्तत्रनुमितिरपलपनीयस्तोगौरवेणेति॥ननुसामानाधिकरण्यमेकाधिकरणसंबंधः॥एवं
चसमूहालंबनादिविशिष्टज्ञानस्यभेदान्यथानुपपत्याविशेषणप्रतियोगिकविशेष्यानुयोगिकसंबंधोविशिष्ट
धीविषयत्वेनकल्पनीयःतथाचवन्हिव्याप्यधूमवान्पर्वतइत्यत्रधूमेवन्हिव्याप्तिवैशिष्ट्यानुयोगित्वपर्वतवृ
त्तित्वप्रतियोगित्वरूपद्वयसामा॥नाधिकरण्यंभासतएवेत्यतआह॥संबंधसंबंधेति॥समूहालंबनादिवि

ष्टज्ञानस्यभेदान्यथानुपपत्त्या अनुयोगित्वादिसंबंधभानवत्सामानाधिकरण्यभानमपि भविष्यतीति अतः सं
बंधसंबंधाविषयकत्वेपि समूहालंबनेत्यत्र विशेष्यताविशिष्टज्ञाने च विशेषणे प्रकारता संसर्गे च संब
धता विशेष्ये विशेष्यताख्यविषयतेति विषयाविलक्षण्येपि विविषयतो वैलक्षण्यादेव वैलक्षण्यं विशि
ष्टज्ञानस्येति भावः॥ ननु विषयावैलक्षण्येपि विषयतावशेषात् ज्ञानवैलक्षण्ये जितं साकारवादिना तथा
चार्थे नैवविधयां विशेषइत्यनुरोधात् समूहालंबनविषयता अनुयोगित्वं च विशिष्टधीविषयइत्यपेमत
आह॥ भ्रमस्थलइति॥ ह्रदो वह्निमानिति भ्रमानुमितिस्थलइत्यर्थः॥ ननु असदेव सामानाधिकरण्यं
तत्र प्रसिद्धमत आह॥ असदिति॥ असतो वैशिष्ट्यस्य सदुपरागेणापि भानस्य निरासादित्यर्थः॥ नत्वप्र
तियोग्यप्रसिद्धिः॥ शुक्तिविशेषकत्वावच्छिन्नरजतत्वप्रकारकत्वस्य रजतत्वप्रकारकत्वस्य रजतत्व
प्रकारकत्वसामान्यस्य वा यत्किंचित्प्रमात्वघटकप्रकारतानियामकसंबंधनिरूपितत्वनियमबलेना
पतितस्तन्निरासात् असद्वैशिष्ट्यज्ञाने तु रजतत्वप्रतियोगिकशुक्त्यनुयोगिकवैशिष्ट्यस्य किंचित्प्रमात्वप
टकप्रकारताया नियामकतया शुक्तौ रजतत्वप्रकारितायां तादृशसंबंधनिरूपितत्वाभावेनाहृशनियमभंगादि १५

ति॥ननुपक्षवृत्तित्वेव्याप्तिवैशिष्ट्यसामानाधिकरण्यावगाहिज्ञानमेवव्याप्तिविशिष्टपक्षवृत्तित्वसामाना
धिकरण्यज्ञानपदप्रतिपाद्यं॥तत्रसामानाधिकरण्येव्याप्तिविशिष्टपक्षधर्मत्वयोरन्वयबाधेपितादृशज्ञानान्व
येऽबाधस्तथाचतादृशज्ञानजन्यत्वंलक्षणंनाव्याप्तमतआह॥अवांतरेति॥तथाचैतादृशलक्षणेनैतादृश
लक्षणबाध्यप्रतिपाद्यमितिभावः॥लक्षणाव्याप्तिमुक्त्वालक्षणवाक्यजंन्यशाब्दबोधानुपपत्तिमप्याहअवांत
रेतिकश्चित्॥विषाणेविषाणत्वावच्छेदेनशशसंबंधेति॥शशविषाणेत्यत्रषष्ठ्यर्थेलक्षणयाशशसंबंधि
विषाणेतिशाब्दबोधेशशसंबंधिभेदस्यैवशशसंबंधाभावस्यापिविषाणेनिर्णयोविरोधीत्यर्थः॥प्रमाणप्रस्ता
वादिति॥प्रमाणप्रस्तावादिति॥प्रमाणतत्त्वमिहविविच्यतइत्यतप्रमाकरणलक्षणस्यैवप्रसक्तत्वेनतदर्थं
प्रमायालक्षणस्यैवोचितत्वादित्यर्थः॥प्रमैवेति॥ननुप्रमाकरणलक्षणानुपयोगिनीभ्रांतिरपीत्यर्थः॥प्र
मैवेति॥ननुप्रमाकरणलक्षणानुपयोगिनीभ्रांतिरपीत्यर्थः॥उपाध्यायमतेपक्षतावच्छेदकसामानाधि
करण्येनैवसाध्यंसर्वत्रानुमितिविषयः॥ननुपक्षतावच्छेदकावच्छेदेनापिअवच्छेदकत्वंतस्यव्यापकत्वा
घटकत्वेनसाध्यसंबंधविधयाभानासंभवात्तथाचगंधप्रागभावावच्छिन्नोघटोगंधवानित्यनुमितिःप्र

मेवेस्यतोयदिचेति॥ यक्षतावच्छेदकावच्छेदेनसाध्यभानस्यानुभाविकत्वादसंसर्गाग्रहादिसामान्यसामग्रीवशा
दनुमितावप्यवच्छेदकत्वंभासतएवेतिभावः॥ चरमेतिप्रथमज्ञानपदस्यतत्परत्वेतत्रैवातिव्याप्तेरितिभावः॥
प्रमापरमिति॥ यावद्भिन्नभिन्नत्वं॥ अव्याप्येति॥ अप्राप्येवाप्यत्वावगाहिनाअपक्षधर्मेपक्षधर्मत्वावगाहिने
त्यर्थः॥ वस्तुतोवस्तुगत्यासाध्यवान्वयःपक्षस्तदवगाहितयानत्तुतस्याअनुमितेर्लिंगोपधानांशेभ्रमत्वेनलक्ष्य
मत्तआहलिंगोपहितेति॥ प्रमाणत्वादितिशेषः॥ ननुवस्तुगत्यासाध्यवान्वयःपक्षःतत्रेश्वरस्यतादृशंज्ञा
नंप्रसिध्धमतस्तज्जन्यत्वस्यतद्बुतौसत्वान्नव्याप्तिरतईश्वरेति॥ अतिप्रसंजकत्वादिति॥ तादृशपरामर्ष
त्वेनतस्यहेतुत्वाभावादुपादानप्रत्यक्षत्वेनतज्जन्यत्वस्यप्रभामात्रेतिप्रसक्तत्वादितिभावः॥ अतएवता
दृशप्रमानुमितावव्याप्तिरेव॥ तत्तज्ज्ञानंवेतिव्याप्तिविशिष्टेयत्पक्षधर्मताज्ञानमित्येवंरूपसम्मितत्तुरूपोनेत्यर्थः॥
पदार्थतावच्छेदकेति॥ नचैवंस्वरूपैकशेषस्यद्वंद्वापवादकत्वानुपपत्तिरेकविषयत्वाभावादितिवाच्यं॥ पद
जन्यप्रतितिविशेषरूपस्यपदार्थस्यभेदापेक्षयापदजन्यप्रतितिविषयभेदएवद्वंद्वस्यलाघवनकल्पना
त्॥ एवंचनीलपटयोरिसचपदजन्यप्रतितिप्रकारभेदात्॥ पटावित्यत्रविशेष्यभेदात्॥ द्वंद्वस्यप्रसक्तिः॥ अ

स्येर्दीव्यतीत्यत्र नानार्थ एव सरूपैकशेषस्य सार्थकत्वात् यथाश्रुतेपि नानुपपत्तिरिति॥ ननु नीलघटपटयोरभे
द इत्यादौ द्वित्वं कुत्रान्वेतु न तावद्विशेष्ये तस्यैकत्वात्॥ न विशेषणे तया: पदार्थतावच्छेदकत्वेन निराकांक्षस्
त्वात्॥ न च प्रकृत्यर्थवृत्तिसंख्यावाचकत्वं स्वरूपं न तन्मात्रवृत्तिसंख्याबोधकत्वं॥ अत एव एकस्मिन्नपाथः
परमाणौ आप इत्यत्र तद्गतगुणानादाय बहुवचनं समर्थितं वर्द्धमानोपाध्यायैरिति वाच्यं॥ एकस्मिन् घटे
एको घटाइत्यत्र असाधुत्वज्ञानाभावदशायां शाब्दबोधप्रसंगात्॥ तत्र द्विवचनं पदसाधुत्वायैवेति चेत् तर्हि क
र्मधारय एवास्तु किमर्थं पदार्थभेदमनादृत्य द्वंद्वकल्पनमिति चेत्॥ नीलघटयोरित्यत्र कर्मधारये नीला
भिन्नघटत्वेनोपस्थितौ घभेद इत्यस्य निराकांक्षत्वादनन्वयप्रसंगात्॥ ननु पदार्थयोरभेदस्थलेपि द्वंद्वस्य
साधुत्वे कर्मधारयः किमर्थं पृथगंगीक्रियत इत्यत आह॥ पदार्थद्वयेति॥ तथा च यत्राभेदसंसर्गकबोधे
तात्पर्यं तत्र द्वंद्वासाधुत्वात् कर्मधारयादेव तादृशबोध इति भावः॥ भेदाभेदोदासीनेति॥ भेदाभेदाविषयके
त्यर्थः॥ इदं च तादृशपदार्थद्वयबोधे विशेषणं॥ पदार्थयोरभेदे कर्मधारयवत्॥ पदार्थयोर्भेद एव द्वंद्व इ
त्यनुशासनात्॥ स्वरससिद्धं मतमनुसृत्याह॥ विशिष्टपदस्येति॥ यत्तु यत्कस्मिन्नेव चैत्रे चैत्र त्वचैत्रसंबं

धानांपदजन्यप्रतीतिविषयाणांभेदेद्वंद्वापतिरतो विशिष्टेति॥ तदसत्॥ एकपदेद्वंद्वस्यतदपवादकएकशेषस्य
चापादयितुमशक्यत्वात्॥ किंचसमस्यमानप्रत्येकपदार्थयोर्विशेषणविशेष्यतायोर्भेदस्तयोर्द्वंद्वापवादकोन
त्वेकपदार्थयोरेवविशेषणविशेष्ययोर्भेदइतिनायंपंथाः॥ कर्मधारयेति॥ नपुंसकेभावेक्त इत्यस्यानुशा
सनात्॥ व्याप्तिवैशिष्ट्यमेवव्याप्तिविशिष्टपदार्थः॥ तथाचव्याप्तिवैशिष्ट्यपक्षधर्मतापदयोर्द्वंद्व इतिभा
वः॥ एतेनवैशिष्ट्यशक्तधात्वर्थतरक्तप्रत्ययस्याश्रयोपस्थापकस्याश्रयत्वेलक्षणायांव्याप्तिवैशिष्ट्याश्र
यत्वोपस्थितौव्याप्तिवैशिष्ट्याश्रयत्वपक्षधर्मत्वज्ञानजन्यत्वमर्थस्यात्तथाचव्याप्तवानितिपरामर्शस्यसं
बंधाविषयत्वात्सैवाव्याप्तिरितिपरास्तं॥ एवमपीति॥ एकधर्मिणीतिविशेषणेपि॥ समासकेति॥ तथा
चव्याप्यत्ववानितिशाब्दपरामर्शस्थलायानुमित्याव्याप्तिः॥ धूमत्वावच्छिन्नव्याप्तिवैशिष्ट्यज्ञानंधूमत्वावच्छि
न्नपक्षधर्मताज्ञानंचकारणमितिकारणताद्वयकल्पनेगौरवं॥ वक्ष्यमाणव्याप्त्यवच्छेदकधर्मप्रकारकपक्षध
र्म॥ ज्ञानत्वेनहेतुत्वेक्रौचमत्कालीनत्वंतत्पुरुषीयत्वनिवेशादनंतकार्यकारणभावाप्रतिरिति॥ मिथइति॥
तदुभयंव्याप्तिविशिष्टत्वपक्षधर्मत्वोभयं॥ नपश्लेषः परस्परसामानाधिकरण्यं॥ अव्यापकत्वात्तद्व्याप्यवा १६

निति परामर्शेतदसंभवादित्यर्थः॥ नचतदुन्नयेतितदुन्नयविषयत्वनियधर्मः परामर्शत्वं परामर्षत्वेन हेतुतायां
मानाभावादित्याशयः॥ नचतत्प्रत्यक्षेपरामर्षत्वेन हेतुतायांमानाभावादित्याशयः॥ नचतत्प्रत्यक्षेतत्वे
नहेतुत्वात् वन्हिव्याप्योधूमोद्रव्यं पर्वतवृतित्यादिज्ञानप्रत्यक्षेअतिव्याप्तिरेवेतिवाच्यं॥ अनेकवृतित्वेनध
धर्मस्यविशेषणत्वात्॥ तद्व्यक्तित्वस्यैकमात्रवृत्तित्वात्॥ विषयस्यतत्वेनकारणत्वंनास्तीत्याशयेनेदमि
तिकश्चित्॥ पक्षधर्मताविषयत्वनियतधर्मावछिन्नेत्यत्रकेचपक्षधर्मतायाः पर्वतसंयोगादिरूपतया
धूमधूमाभावसाहचरितवन्हिमान् पर्वतइत्येवमाकारज्ञानत्वावछिन्नजनकतानिरूपितजन्यताश्रये
पर्वतोवन्हिमान्नवेत्संशये॥ तिव्याप्तिस्यादतद्वारणाय व्याप्तिविषयकत्वमावश्यकं॥ नचैवमपिधूमव्या
प्यभावसहचरितवन्हिमानित्येवंरूपसाधारणधर्मवद्धर्मिज्ञानजन्यपर्वतोधूमव्याप्यवान्नवेतिसंशये
तिव्याप्तिरितिवाच्यं॥ पक्षधर्मताविषयत्वदलेनापितद्वारणात्॥ तथाचव्याप्तिविषयत्वदलेनापितद्वा
रणात्॥ तथाचव्याप्तिविषयत्वदलस्यसंशयविशेषातिव्याप्तिवारकतयाव्यवर्त्तकत्वामस्तिनतुपक्षधर्मता
पदस्येत्याशयात्॥ धूमवत्पर्वतसंयोगप्रत्यक्षेसंबंधातावछेदकधूमप्रकारकपर्वतज्ञानत्वेनहेतुत्वातत्रापि

व्याप्तिरतः॥पक्षधर्मतोपदानवैयर्थ्यमुक्तमित्यापिकश्चित्॥व्याप्तिज्ञानत्वपरामर्शत्वावच्छिन्नकारणताद्वयशा
भायव्याप्तिविषयकत्वनियतत्वंविकाशातत्तयोरुक्तमित्यने॥वस्तुतस्तु॥पक्षधर्मताविषयत्वेरूपादानेधूम
वान्पर्वतोनास्तीत्यभावलौकिकप्रत्यक्षेप्रतियोगितावच्छेदकधूमप्रकारकपर्वतज्ञानजन्येतिव्याप्तिःअतोव्या
प्तिविषयकेत्यावश्यकंनचतथापिवह्निव्याप्यवान्पर्वतोनास्तीत्यभावलौकिकप्रत्यक्षेप्रतियोगिताव
च्छेदकधूमप्रकारकज्ञानजन्येतिव्याप्तिरितिवाच्यं॥निरुक्तमतेरितिंद्रियतयातदवच्छिन्नप्रतियोगिताका
भावस्यापिअतिंद्रियत्वात्॥तत्रतेनरूपेणाहेतुत्वात्॥एवंव्याप्तिपदस्याभावमात्रपरत्वेअभावत्वप्रकारकत्वनि
यतधर्मावच्छिन्नकारणताप्रतियोगिककार्यताशालित्वविवक्षणेअनुमितिमात्रएवलक्षणमायाति॥परंतु
स्यत्वविशेषेऽतिव्याप्तिर्नवर्तिपक्षधर्मतोपादानेत्वव्याप्तिरत्तिव्याप्तिश्चेत्यतोपिपक्षधर्मतोपादानवैयर्थ्यमुक्त
मितिध्येयं॥वस्तुतस्तु॥विशिष्टवैशिष्ट्यबोधादौअतिवारणायवास्यविषयकत्वेनजन्यंज्ञानंविवक्षणीयमितिव
क्षति॥तथाचपक्षधर्मताविषयकत्वनियतत्वादिविवक्षणेधूमवत्पर्वतवानितिविशिष्टशिष्टयशिष्टयबोधे
व्याप्तविषयकेऽतिव्याप्तिरतोव्याप्तिविषयकेत्यादि विवक्षणमावश्यकं॥नचपक्षधर्मतापदमुपादायत १७

त्रपक्षधर्मत्वाविषयत्वेनैवजन्यंज्ञानंविशेष्यतां॥तावतापिविशिष्टवैशिष्ट्यबोधादावतिव्याप्तिवारणासंभवादि
तिवाच्यं॥तथासत्यसंभवापत्तेः॥पर्वतोवन्हिमान्इत्यनुमितेरपिवन्हित्तिष्टपक्षधर्मताविषयत्वात्हेतुताव
च्छेदकरूपेणपक्षधर्मत्वाविषयत्वोक्तौवन्हिव्याप्यवत्पर्वतनानितिविशिष्टयबोधेऽतिव्याप्तिःव्याप्तिप्रका
रकपक्षधर्मताविषयत्वोक्तौचव्याप्तिविषयकत्वस्यैवलघुत्वेनविवक्षणीयत्वादितिसारं॥व्याप्तिविशि
ष्टपदपक्षधर्मतापदयोःधर्मधारयःविशिष्टपदंचप्रकारकपरमित्याशयेनाह॥व्याप्तीति॥यद्यपिवन्हिव्या
प्यो धूमो द्रव्यवान्पर्वतइतिज्ञानस्यापिव्याप्तिप्रकारकत्वात्पक्षधर्मताज्ञानत्वाचतज्जन्यानुव्यवसायेऽति
व्याप्तिःउक्तरूपेणजनकत्वोक्तौचासंभवएववन्हिव्याप्योधूमोधूमवान्॥पर्वतइतिज्ञानसाधारणत्वात्तथा
पिपक्षधर्मतांशेव्याप्तिप्रकारकत्वंविवक्षितं॥तत्रपक्षविशेष्यतानिरूपितप्रकारतावच्छिन्नाधाराविशेष्यतात
न्निरूपितव्याप्तिप्रकारताकत्वंधूमेवन्हिव्याप्योधूमवान्पर्वतइत्यत्रपर्वतविशेष्यतानिरूपिताधूमनिष्ठप्र
कारतानिरूपितविशेष्यतावच्छेदिकाकिंतुधूमस्यमकरव्यविशेष्यतेतिनतत्साधारण्यमितिध्येयंअत्रापि॥
तादृशविवक्षणेपिवन्हिव्याप्येंधनवानयमित्युक्तौवन्हिमदयावृत्तित्वरूपप्रकारकत्वसंभवनास्यादतोवि

त्रिष्याह॥इंधनसमानाधिकरणेति॥भ्रमानुमितेरितिसर्वेभ्रमात्मकपरामर्शजन्यायांविषयाबाधेनभ्रमानुमि
तावव्याप्तिप्रदर्शितेतिभावः॥वृत्त्यनियामकसंयोगेनसाध्यतायांहेतुयांचाकाशानुमितिःपरमर्शश्चभ्रमैवस्याद
तोवृत्तिनियामकसंयोगसंबंधेनहेतुतासाध्यताप्रतिपत्त्यर्थमाह॥अत्रेति॥सप्तम्याआधेयत्वप्रतिपादनात॥नि
तरामिति॥साध्येव्यापकत्वप्रकारकंसाधनेसामानाधिकरण्यप्रकारकमित्येवंव्याप्तिप्रकारकत्वोक्तौपूर्व
व्याप्तिनिरासःस्यात॥अत्रतुव्यापकत्वसमानाधिकरण्ययोरुभयोरप्यप्रसिध्याऽव्याप्तिवारणंनसंभ
वतीतिभावः॥तथाऽव्याप्तिःतावत्पदार्थानांव्याप्तिशरीरनिविष्टपदार्थानां॥तथाविधेतिव्याप्तिज्ञानेयत्रय
स्ययेनसंबंधेनप्रकारतातत्रतेनसंबंधेनतत्प्रकारकमित्यर्थः॥तच्चाधिकरणेहेतुप्रकारकंअभावेतादृ
शाधिकरणवृत्तित्वप्रकारकंप्रतियोगितायांतादृशाभावप्रकारकमित्यादिक्रमेणबोध्यं॥नचव्यतिरेके
णेति॥तत्रपक्षधर्मताज्ञानवन्ह्यभावव्यापकाभावप्रतियोगिधूमत्वस्यैवप्रकारकत्वादितिभावः॥ननुधूमव्या
पकवन्हिसामानाधिकरण्यधूमत्वस्यवन्ह्यभावप्रतियोगिधूमवत्वस्यचज्ञानंवन्ह्यभाववद्वृत्तित्वरूपव्यभि
चारधियंप्रतिग्राह्याभावावगाहित्वेनतद्व्याप्यावतागाहित्वेनवानप्रतिबंधकमतआह॥भवतीहीति॥त

यथा चातथाभूतस्याप्यनायत्यामणिमंत्रादिन्यायेनविरोधित्वंकल्प्यतइत्याशयः॥ननुधूमव्यापकवह्निसमा
नाधिकरणत्वसंभवानितिज्ञानेधूमसमानाधिकरणात्यंताभावप्रतियोगितानवच्छेदकवह्नित्ववानितिज्ञा
नेववह्न्यभाववद्वृत्तिर्धूमइतिव्यभिचारज्ञानविरोधित्वसत्वात्जन्यप्रत्यक्षेऽतिव्याप्तिःउक्तरूपेणहेतुत्वो
क्तौचासंभवएवोक्तरूपस्यतादृशधूमसमानाधिकरणासंभवानितिज्ञानसाधारणतयाजनकतानवच्छेदक
वह्नित्ववानितिज्ञानेववह्न्यभाववद्वृत्तिर्धूमइतिव्यभिचारज्ञानविरोधित्वसत्वात्ऽजन्यप्रत्यक्षेतिव्याप्तिः
उक्तरूपेणहेतुत्वोक्तौचासंभवएवोक्तरूपस्यतादृशधूमसमानाधिकरण्यवृत्त्यसंभवानितिज्ञानसाधार
णतयाजनकतानवच्छेदकत्वादित्यतआह॥तथाविधेति॥नतथा॥नपक्षधर्मतयाज्ञातेव्यभिचारधीवि
रोधिधीविषयःतथाचतद्विशिष्टव्यभिचारधीविरोधिविषयधर्मप्रकारकतद्विशिष्टवत्पक्षधर्मताज्ञानजन्य
त्वमर्थः॥उक्तज्ञानंतुपक्षधर्मतयाज्ञातेरासभत्वविशिष्टेनव्यभिचारधीविरोधिधीधूमत्वविशिष्टेतथात्वेपि
तस्यनपक्षधर्मतयाभानमितिभावः॥ननुधूमसमानाधिकरणेत्यादिव्याप्तेरेवोक्तरूपव्यभिचारधीविरोधि
धीधूमत्वविशिष्टेतथात्वेतितस्यनपक्षधर्मतयाभानमितिभावः॥ननुधूमसमानाधिकरणेत्यादिव्याप्तेरेवो

क्तरूपव्यभिचारधीविरोधित्वेमानाभावः केवकथाव्यतिरेकव्याप्तेः॥ नचवन्हित्वंधूमसमानाधिकरणाभावप्र
तियोगितावच्छेदकमित्येवंसमूहालंबनात्मकव्यभिचारधीविरोधित्वंवाच्यं॥ तथापिधूमव्यापकवन्हिकालीनधूम
वान्पर्वतइतिज्ञानस्यसामानाधिकरण्यविषयकतया अनुमित्यजनकस्यसंग्राहकतया उक्तरूपस्यानुमिति
जनकतानवच्छेदकत्वात्॥ नचधूमव्यापकवन्हिसमानाधिकरणधूमवान्पर्वतः वन्ह्यभावव्यापकाभाव
प्रतियोगिधूमवान्पर्वतइतिज्ञानयोरन्यतरत्वेमवहेतुतावच्छेदकमतः तथैवलक्षणेनिवेश्यमितिवाच्यं॥
अन्यतरत्वघटकभेदानांविशेष्यभावेविनिगमनाविरहेणनानाकार्यकारणभावावश्यकत्वेतदपेक्ष्यपाला
घवात्प्रत्येकरूपेणैवहेतुत्वकल्पनायान्याय्यत्वादतआह॥ व्यतिरेकसहचारेणेति॥ ननुमणिमंत्रादिन्या
येनविरोधित्वेमानाभावः क्वचित्कानयव्यतिरेकानुविधानस्यतादृशव्यभिचाराद्युन्नायकत्वेनाप्युपयो
गादित्यस्वरसादाह॥ व्यतिरेकसहचारेणेतिकश्चित्॥ भ्रमसंशयेतरेति॥ भ्रमसंशययोर्विपरीतज्ञानत्वेनानु
गमः विपरीतंचव्यावर्त्तकमात्रंतेनस्थाणुत्वभ्रमो[illegible]तरस्यपुरुषत्वाभावभ्रमोतरस्यचपुरुषत्वप्रत्यक्षस्य
नासंग्रहः॥ तदुत्तरप्रत्यक्षत्वंचाव्यवहितोत्तरत्वसंबंधेनतादृशविपरीतज्ञानवत्त्वप्रत्यक्षानिर्णयत्वं॥ तेना १९

व्यवहितोत्तरत्वस्य तत्रान्धक्तिविश्रांतत्वेपिनक्षतिः॥ नवा तत्संशयोत्तरसंशये व्यभिचार इति॥ उपाध्यायमते हितन्नि
र्णयं प्रति तदभावज्ञानत्वेनैव विरोधिता तत्र चाप्रामाण्यनिर्णयस्येव विशेषदर्शनादेरप्युत्तेजकत्वं एवं व्यंज
कासमवधानकालीनांधकारकालीनतत्संशयोत्तरं तन्निर्णये व्यंजकस्य समवधानालोकस्य समवधानम
प्युत्तेजकं वाच्यं॥ नचैवं यत्र पर्वतो वन्हिमान्नवेति संशयानंतरं वन्हिव्याप्यधूमवान्पर्वतः आदिवदनु
नुमितिरप्रमा चेति समूहालंबनात्मकः अपेक्षानुद्बुद्धात्मकश्चमानसः परामर्शः तत पर्वतो वन्हिमान्
इत्यनुमितिः ततः पर्वतो वन्ह्यभाववानिति लौकिकप्रत्यक्षं तत्रापेक्षानुद्बुद्धात्मकपरामर्शेन पुनरनुमित्या
पत्तिः एवमंधकारघटसंशयानंतरमालोकसमवधाने घटनिर्णयानंतरं पुनः विशेषदर्शनप्रयुक्तघट
संशयानंतरं विनैव विशेषदर्शनं घट इति प्रत्ययापत्तिः पूर्वोत्तेजकस्यालोकस्य समवधानस्य सत्वा
दिति वाच्यं॥ तत्तत्कालाद्यवच्छिन्नविशेषदर्शनाद्यभाववि[ं]शिष्टतद्विपरीतज्ञानाद्यभावत्वेन तन्नि
श्चयत्वावच्छिन्नं प्रति हेतुत्वादिति॥ बाधनिश्चयस्य स्वातंत्र्येण विरोधितायां तु विशेषदर्शनेन तत्काला
वच्छिन्नत्वं न देयं॥ स्वमते संशयोत्तरप्रत्यक्षत्वावच्छिन्नं प्रति विशेषदर्शनस्य न हेतुता अंधकारस्थ

पटसंशयोत्तरप्रत्यक्षेव्यभिचारात्॥नचतादृशविपरितज्ञानविरोधित्वेनहेतुताविशेषदर्शनालोकादिसाधार
णस्यविरोधित्वस्यैकस्याभावात्॥किंचविशेषादर्शनप्रयुक्तसंशयानंतरंआलोकसमवधानस्यपुरुषात
रीयांधकारस्तुघटसंशयविरोधिनः॥सत्वात्तत्प्रत्यक्षापत्तिः॥तत्पुरुषीयतादृशविपरीतज्ञानोत्तरप्रत्यक्षंसंप्र
तितत्पुरुषीयतादृशविपरितज्ञानविरोधित्वेनहेतुत्वास्यैक्येचातीवगौरवं॥पुरुषांतरविशेष्यदर्शनस्यापि
तादृशविरोधित्वस्वरूपयोग्यत्वादतिप्रसंगश्च॥एवंतादृशविपरितज्ञानवत्प्रत्यक्षनिर्णयत्वंनकार्यता
वच्छेदकंअर्थसमाजग्रस्तत्वात्॥किंचभ्रमसंशयानुत्तरनिर्णयसामान्यसामग्रिसत्वेभ्रमसंशयोत्तरमपि
सामान्यनिर्णयापत्तिर्दुर्वारैवतदनुत्तरप्रत्यक्षेपिसामग्र्यंतरकल्पनेतिगौरवंमनानाभावाच्च॥एवंचविषदर्श
नमितरकोटिज्ञानविरोधितयासंशयोत्तरतादृशप्रत्यक्षउपयुज्यतइत्यभिसंधायाह॥हेतुमतइति॥न
चसर्वमतएवहिविशेषदर्शनस्यविशेषणधीत्वेनहेतुत्वामतइत्यसंगतं॥विशेषदर्शनत्वेनैवतस्यहेतुतयाप
रमर्शत्वेनहेतुत्वविवक्षणेपितीत्रीव्याप्तिरितिपूर्वपक्षिणश्चाशयात्॥विशेषणधियोहेतुत्वाभिप्रायेणेद
मितिपिकश्चित्॥तथाविधेति॥व्याप्तिप्रकारकपक्षधर्मतानिश्चयत्वेनेत्यर्थः॥भ्रमादीति॥अन्यथायावत् २०

कधर्मदर्शनव्यंजकधर्मदर्शनालोकादिसाधारण्याभावेन व्यभिचारप्रसंगादिति॥ श्वैत्यव्याप्यसंख्यात्ववायन
मितिदर्शानन्तरं पीतत्वञ्चाविरोधीति ततः॥ श्वैत्यप्रत्यक्षं॥ केचित्तु विशेषदर्शनाद्यतिरिक्तयावत्कारणकालीनत
दृशसंशयोत्तरप्रत्यक्षं प्रतिताद्दृशसंशयविरोधिदर्शनत्वेन व्यावर्तकधर्मदर्शनादिसाधारणरूपेण हेतुता॥
आलोकाभावप्रयुक्तसंशयोत्तरप्रत्यक्षे आलोकसमवधानं हेतुरित्याहुः॥ अत एव तथाविधानिश्चयत्वे
न हेतुत्वविवक्षणादेव॥ लिंगवत्त्वादिकं लक्षणस्वरूपं यस्यैवंभूतो योतिदेशवाक्यार्थस्तस्य यत्ज्ञानं वन्हि
व्याप्यधूमवत्पर्वतसदृशं महानसपदवाच्यमित्याकारकं॥ तज्जन्यायामित्यर्थः॥ तथाविधेति॥ धूमवत्पर्वतसा
दृशविशिष्टमहानसपदवाच्यत्वज्ञानत्वेनेत्यर्थः॥ न्यायार्थीति॥ पंचावयवैरेकवाक्यतया बोधे जन्य इति
चिंतामणिकारीत्याहुरिदमयुक्तम्॥ तत्तदुपनयार्थविशिष्टकनिगमनार्थे विशेषणकशाब्दबोधेऽतिव्या
प्तिर्वोध्या॥ ननूपनयेन वन्हिव्याप्यधूमस्य पर्वते साक्षात्प्रकारतया भानं किंतु मतुवर्थसंबंधिनो भेदसं
बंधेन प्रकारतया भानमिति॥ तादृशनिश्चयत्वे हेतुत्वविवक्षयैव तत्र नातिव्याप्तिः॥ तथाप्यायमित्युपन
याः सिध्य एव स्यात आह॥ तच्छद्वेति॥ यत्र वन्हिव्याप्यधूमवत्पर्वतोपस्थित्यानन्तरं वन्हिव्याप्यधूमवान्

पर्वतोस्थितिशाब्दबोधेऽतिव्याप्तिः॥ ननुतत्तद्धानांबुद्धिस्थत्वेनैवोपस्थितिःशाब्दबोधेऽतिव्याप्तिः॥ ननुतत्तद्धा
नांबुद्धिस्थत्वेनैवोपस्थितिःशाब्दबोधस्यविशेषधर्मप्रकारकधीर्मानसातिनतत्रातिप्रसंगइत्यतआह॥
संकेतितेति॥ यत्रवन्हिव्याप्यधूमवत्पर्वतएवघटपदस्यसंकेतस्तत्रघटोस्तीतिवाक्येनवन्हिव्याप्यधूम
वान् पर्वतोस्तीतिबोधोजनितः तत्रातिव्याप्तिरित्यर्थः॥ ननुमादृशांवाक्यार्थज्ञानंनावांतरवाक्यार्थज्ञानजं
न्यमतःकथंन्यायार्थज्ञानेतिव्याप्तिरतआह॥ व्युत्पादपिप्यतेति॥ पटजन्यत्वस्येति॥ घटादिपदादाश्रय
त्वादिसंबंधेनाकाशोपस्थितावपिशाब्दबोधानुदयात् वृत्त्यास्वजन्यघटोपस्थितेर्हेतुत्वमित्यर्थः॥ ननु
घटशाब्दबोधंप्रतिवृत्त्याघटोपस्थापकपदज्ञानत्वेनकारणता वृत्त्यास्वजन्यपटोपस्थितिःव्यापारः व्या
पारस्यहेतुतावघटत्वप्रकारकज्ञानत्वेनैवावच्छिद्यते नचैवंप्रत्यक्षोपस्थितेघटेपटोपस्थितिव्यापकेरघटप
दज्ञानेसतिघटशाब्दबोधापत्तिः॥ घटशाब्दबोधेपटोपस्थितेरजनकत्वेनाव्यापारत्वात्॥ नचैवमपिघटपदज
न्यपटोपस्थितौसत्यांचप्रकारांतरेणघटोपस्थितेरपिशाब्दबोधजनकत्वापरितिष्ठत्वात्॥ पदजन्यपदा
र्थोपस्थित्यभावकालेशाब्दबोधानुत्पत्तावताप्युपपन्नत्वात् तथा च पदार्थोपस्थितेर्हेतुतायांपदजन्यत्वा २१

प्रवेशात्तद्घेवतिव्याप्तिरतआह॥निश्चयत्वस्येति॥उद्बोधकविधयापदज्ञानस्यपदजन्यपदार्थोपस्थितेरेव
व्यापारत्वेनतस्यस्मरणरूपतयाशाब्दबोधरूपतयावानिश्चयभिन्नत्वासंभवेनतद्वारणायसंशया—
त्वस्यचप्रवेशार्थक्यादितिभावः॥केचित्तु॥पदार्थोपस्थितिकरणतायांपदजन्यत्वमधिकंनिविष्टंनिश्च
यत्वंचानिविष्टमित्यतिव्याप्तिरत्यंतासंभवदर्शनार्थमिदमित्याहुः॥तथापिपदार्थोपस्थितिकारणतामा
दायतिव्याप्तिवारणेपितादृशप्रत्यक्षेवन्हिव्याप्यधूमवत्पर्वतवानितिप्रत्यक्षइत्यर्थः॥शाब्दबोधइति॥वन्हि
व्याप्यधूमवत्पर्वतंबुद्धिस्थीकृत्यातद्धानितिशाब्दप्रयोगवन्हिव्याप्यधूमविशिष्टपर्वतस्यतच्छब्दार्थतयाता
दृशविशिष्टवैशिष्ट्यधीसंभवादित्यर्थः॥तादृशविशिष्टवैशिष्ट्यावगाहिशाब्दबोधेपदजन्यविशेषणता
वच्छेदकप्रकारकधियोविशिष्टहेतुत्वकल्पनेपितादृशविशिष्टवैशिष्ट्यबोधत्वावच्छिन्नंप्रतितादृशविशेष
णतावच्छेदकप्रकारकनिश्चयत्वेनहेतुताप्रत्यक्षादिसाधारणीयातामादायशाब्दबोधऽतिव्याप्तिरितिभावः॥
चकाराद्वन्हिव्याप्यवत्पर्वताभिन्नःपर्वतपदवाच्यइत्युपमितिसंग्रहः॥ननुतत्कारणतायांनिश्चयत्वंन
विशिष्टमतआह॥दंडोरक्तोभवेति॥रक्तदंडवानितिज्ञानंद्वेधा॥एकंविशेष्येविशेषणंतत्रचविशेषणांतरमि

तिरीत्याअन्यद्विशिष्टस्यैवशिष्टयमितिरीत्याद्द।।तत्राद्यंपुरुषनिरूपितदंडनिष्ठविशेषणतानिरूपितरक्तत्वविशेष
षणत्वाशालित्वंनिरूपितत्वंविशेषणतायास्वरूपसंबंधविशेषःप्रतीतिसाक्षिकःदंडो रक्तोदंड
वानितिज्ञानेचदंडनिष्ठविशेषणतानिरूपितानरक्तत्वनिष्ठेनेविशेषणतेतिवितवितधुदासःकारणंचतावच्छि
शेषणताज्ञानसंसर्गाग्रहश्च।।अतएवनिर्विकल्पकानंतरंदंडोरक्तोनवेतिसंशयानंतरंचताद्दशधीःमावि
लौकिकं।।यदिचताद्दशयकालेविशेष्यविशेषणमितिरित्यापिरक्तदंडवानिति।।नधिःतदानाद्दशबोधंप्र
तिरक्तदंडइतिनिश्चयाभावविशिष्टःताद्दशःसंशयःप्रतिबंधकोवाच्यः।।नचदंडोरक्तोनवेतिसंशयानंतरं
।।इहभूतलेरक्तोदंडोनास्तीतिमानसधीविशेष्यविशेषणमितिरीत्यास्यात।।अभावप्रतियोगितावच्छेदकविशि
ष्टप्रतियोगिनोविशेषणमितिरीत्याज्ञानस्याप्रसिध्धत्वेनतदवच्छिन्नप्रतिबंधकत्वकल्पनायाअयोगादिति
वाच्यं।।लौकिकप्रत्यक्षेइंद्रियशेषविशेषणमितिरीत्याज्ञानस्याप्रसिध्धत्वेनतदवच्छिन्नंप्रतिप्रतिबंधकत्व
कल्पनायाअयोगादितिवाच्यं।।लौकिकप्रत्यक्षेइंद्रियशेष्यविशेषणमितिरीत्याज्ञानस्याप्रसिध्धत्वेनतदव
च्छिन्नंप्रतिप्रतिबंधकत्वकल्पनायाअयोगादितिवाच्यं।।लौकिकप्रत्यक्षेइंद्रियसंबंधविशेषणतायाइव २२

अभावेरक्तदंडीयत्वासंसर्गग्रहस्यापिअभावेरक्तत्वविशिष्टदंडविशिष्टवैशिष्ट्यावगाहिबोधत्वस्यैवका
र्यतावच्छेदकतयातादृशबोधावधारणात्॥ वस्तुतस्तु अभावनिरूपितत्वंदंडनिष्ठविशेषणतानिरूपित
रक्तत्वनिष्ठविशेषणताशालित्वमेवविशेष्यविशेषणमितिरीत्यातदवगाहित्वंतत्वरक्तदंडोनास्तीतिवि
शिष्टवैशिष्ट्यबोधेप्रसिध्धंतदवच्छिन्नंप्रतितादृशनिश्चयाभावविशिष्टसंशयस्यैवप्रतिबंधकत्वात्सं
शयानंतरनिश्चयेनतादृशविशिष्टवैशिष्ट्यबोधानुपपत्तिःअतएवविशेषणमितिरीत्याविषयताविशिष्ट
वैशिष्ट्यबोधसाधारणीप्रवृत्त्यादिजनकतावच्छेदिका॥ नचप्रवृत्त्यादिनियामकाएकांविषयतातद्व्याप्यंच
विशेषणमिति विशिष्टस्यवैशिष्ट्यमितिविषयताद्वयमितिवाच्यं॥ मानाभावात्॥ विशिष्टवैशिष्ट्यबोधेपि
विशेष्यविशेषणमितिरीत्याविषयतायानियामकसत्वेनतदावश्यकत्वेतत्रविशिष्टस्यवैशिष्ट्यमितिविष
यतानियामकसामग्र्याःप्रतिबंधकत्वकल्पनेतिगौरवाच्च॥ एवंखड्गीपुरुषइत्यादौएकत्रद्वयंएकविशेषणं
तरवैशिष्ट्यमितिचविशेषणताद्वयंतत्राप्युक्तरीत्याचरमबोधेतुअनुयोगितावच्छेदकप्रकारकधीर्हेतुःएक
त्रद्वयमितिविषयताचव्यापिकेत्ययमस्माकीनःपंथाः॥ अधिकंचशब्दालोकसारमंजर्यामस्माभिःप्रपंचि

तं॥रक्तदंडवानिति॥विशिष्टवैशिष्ट्यबोधेचरक्तत्वविशिष्टदंडत्वविशिष्टनिष्ठप्रकारताव्यासज्यवृत्तिरेका॥र
क्तत्ववैशिदिष्टयोकंवैज्ञानिकंतेनरक्तवह्निमानित्यादौनविशिष्टवैशिष्ट्यबोधासंभवः अन्यथाचाव्यासज्यवृ
त्तिरक्तत्वादिप्रत्येकंनिष्ठप्रकारतातामादायरक्तत्वादिप्रकारकव्यवहारः। तत्ररक्तत्वविशिष्टदंडत्वविशि
ष्टप्रकारकज्ञानत्वावच्छिन्नंप्रतिदंडत्वविशिष्टांशेरक्तत्वाभावाप्रकारकं दंडत्वविशिष्टावच्छिन्नरक्तत्वप्र
कारकत्वज्ञानत्वंकारणतावच्छेदकं।तेनद्रव्यंरक्तंनवादंडोरक्त इतिज्ञानस्यसंग्रहः नवाद्रव्यंरक्तंदंडः प्रमेय
इतिज्ञानसंग्रहः॥एवंदंडरक्तवानित्याकारकविशिष्टवैशिष्ट्यबोधेपिरक्तत्वविशिष्टदंडत्वाप्रकारकत्वज्ञान
त्वेनहेतुतेतियथानुभवमह्यं॥अतएवविशिष्टज्ञानहेयेमेवविशिष्टज्ञानंतत्वंनकार्यतावच्छेदकं॥अर्थसमा
जग्रस्तत्वादितिमिश्रमतमपास्तं॥रक्तोदंडोनवेतिसंशयानुव्यवसायश्चनरक्तविशिष्टदंडियत्वावगाहिकिंतुर
क्तत्वरक्तत्वाभावप्रकारकोपदंडधर्मिकज्ञानवत्तावगाहिविशेष्यविशेषणमितिरीत्यावारक्तदंडज्ञानव
त्तावगाहीतिनतत्रव्यभिचारः॥विशिष्टविषयोपधानेनेति॥तृतीयाप्रकारोघटमिच्छामीत्यादौघटत्वविशिष्ट
विषयित्वरूपतदुपधानस्येच्छादौप्रकारत्वादिति॥प्रतियोगित्वाभावत्वविषयत्वप्रकारत्वादेरनुपस्थितौ २३

स्यैवप्रकारत्वाभ्युपगमात्॥तथाचविषयितायांनिरूपितत्वसंबंधेनघटत्वविशिष्टवैशिष्ट्यावगाहितादृशे
च्छादिसाक्षात्कारेव्यभिचाराभ्रमज्ञानत्वेतादृशकारणतावच्छेदकमितिभावः॥विनश्यदवस्थाज्ञानादिच्छाद्वेषयोःसा
क्षात्कारःसंभवति॥विनश्यदवस्थज्ञानजनितयोरिच्छाद्वेषयोश्चसाक्षात्कारोनाभ्युपेयतइत्यरुचेदाह॥कृते
श्चेति॥साक्षात्कारोत्सर्वसत्यासत्यर्थविषयस्मृतेरावश्यकत्वेकथंव्यभिचारइतिवाच्यं॥सविषयकसप्रका
रकत्वेनैवसंस्कारादिसाधारणेनप्रत्यासतित्वादिति॥ननुतत्रद्विशिष्टबुध्धौततत्विशेषणधीत्वेनहेतुत्वा
त्कृतिसाक्षात्कारात्पूर्वंविशेषणधीनिमित्तंविषयस्मृतेरावश्यकत्विकथंव्यभिचारइत्यस्तत्रापिज्ञानत्वस्या
प्रवेशदर्शयति॥विशेषणविषयाकादिति॥इदंचविशिष्टज्ञानेकारणतावच्छेदकप्रदर्शनायाविशेषणवि
षकत्वेनचतत्रहेतुत्वात्॥विशेषणविषयकसंस्कारेणनविशिष्टस्मृतिःसमानविषयकत्वेनैवसंस्कारस्मृतेः
कार्यकारणभावादतस्तदुपदर्शनमात्रं॥विशिष्टसंस्कारादिति॥तद्विषयकगुणानांतत्रतादृशविशिष्टबोधे
॥तत्रचगुणानामितिस्वरूपनिदर्शनमात्रं॥विशेषणतावच्छेदकप्रकारकसंशयान्यत्वेनप्रकारतयाविशेष
णतावच्छेदकवत्संशयान्यत्वेनवाहेतुतेतिध्येयं॥नचररूदंडांशेनुद्बुद्धसंस्कारवतःपुरुषांशेलौकिकसंनि

कर्षवतो रक्तदंडवान् पुरुष इति विशिष्टबोधापत्तिः॥ ज्ञानस्य सत्यामपि तत्वे परिरक्तो दंडो न वेति संशयदशायां
तादृशानुद्बुद्धसंस्कारसत्वात्तादृशबोधापत्तिरेवं रक्तदंडादौ लौकिकसंनिकर्षदशायामपीति वाच्यं॥ तत्प्र
त्यक्षव्यक्तिविशेषं प्रति उद्बोधकानामपि तत्तद्व्यक्तित्वेन हेतुत्वात् भवतामपि तत्तदुद्बोधकव्यक्तिविशे
षाणां स्मृतिविशेषहेतुत्वस्यावश्यकल्पत्वे संस्कारस्याप्यतादृशविशिष्टवैशिष्ट्यबोधात्पूर्वं स्मृतिव्यक्ति
विशेषकल्पनाया एव गौरवपराहतत्वात्॥ नच यत्र पुरुषसंनिकर्षदशायां तदुद्बोधकसमवधानं किं
तु तदभावदशायां उद्बोधकसमवधानेन स्मृतिस्तत्र तादृशोद्बोधकस्य प्रत्यक्षव्यक्तिप्रत्यक्षहेतुत्वक
ल्पने गौरवमकल्पने च पुरुषसंनिकर्षदशायां रक्तदंडगोचरानुद्बुद्धसंस्कारसत्वे तादृशप्रत्यक्षा
पत्तिरिति वाच्यं यत्र पुरुषसंनिकर्षदशायामवतादृशसंस्कारोद्बोधकसमवधानेन तादृशसंनिक
र्षाभावकाले स्मृतिवारणाय तादृशोद्बोधकव्यक्तेः स्मृतिहेतुत्वकल्पनाया भवतामपि तुल्यत्वादि
ति॥ अत एव तत्र संस्कार एव प्रत्यभिज्ञायां हेतुरिति प्राचीनाः॥ मणिकारमते तु प्रतिबंधकाभावेस
त्युद्बुद्धसंस्कारेऽवश्यं स्मृतिरिति॥ तत्र स्मृतिरेव प्रत्यभिज्ञा हेतुरिति॥ नन्वनुमितावपि ज्ञानत्वस्य २४

हेतुतावच्छेदके प्रवेशादत आह॥ इच्छादित इति॥ नन्विच्छादितोपि अनुमितिरुत्पद्यत एव क्षणद्वयावेना
नुमित्यभावस्य निर्णेतुमशक्यत्वात्॥ इत आह॥ संस्काराचेति॥ अत्रे चरस्थलकालांतभावेनानुमित्यभा
वः स्फुटनिश्चीत इति भावः॥ ननु तथाप्यनुमितिज्ञानत्वेनैव कथं हेतुत्वं संस्काराद्यन्यत्वेनापि हेतुत्वस्य
वक्तुं शक्यत्वादित्यत आह संस्काराद्यन्यत्वस्येति॥ तत्र अनुमितौ ज्ञानत्वेनैव तादृशनिश्चयघटकतया
विषयत्वेनेति॥ अत्रेदं पत्यामित्यनुव्यवसायसाक्षिको लौकिकस्फमांजलिप्रकाशे साक्षात्कारत्वाव
च्छिन्नविषयताघटितमेव लौकिकप्रत्यक्षलक्षणमुक्तं वर्धमानोपाध्यायैः॥ तत्र तादृशविषयतया प्र
त्यक्षत्वं कारणतावच्छेदकं तेन न परमाण्वादिसाधारण्यं तादृशविषयितया ज्ञेयवत्प्रत्यक्षत्वं कार्य
तावच्छेदकं॥ तेन विषयाजन्यसर्वांशोपनीतभानव्यावृत्तिः॥ न च सर्वांशोपनीतभानाप्रसिद्धिः॥ सर्व
त्रात्मप्रत्यक्षसामग्रीसत्त्वादिति वाच्यं॥ कामिनीजिज्ञासादिवशादात्माद्यविषयकत्वसंभवात्॥ ताद
शप्रत्यक्षस्य च तादृशविषयतासंबंधेन कार्यता॥ तादृशविषयस्य च तादात्म्येन हेतुतेति न व्यभिचारः॥
तत्प्रत्यक्षे तद्विषयकप्रत्यक्षे अत्र चाम्फपेयकविशेषकार्यकारणभावेनैवातिप्रसंगभंगे ज्ञानप्रत्य

सेज्ञानत्वादिनाहेतुत्वकल्पनमेवाप्रामाणिकमित्याशयेनाहकदाचिदिति॥ततदितरात्वादिति॥इदंद्वात्मरः श्रूयमाणत्वप्रत्य
यः प्रत्येकान्वयितेनतत्वतदितरत्वादि॥नाविषयस्यकारणतातद्विषकत्वेन॥तत्वतदितरत्वादिधर्मवद्विषयकत्वेनप्रत्यक्ष
स्यकार्यतातथाचव्याप्तिप्रकारकपक्षधर्मताविषयकसंशयान्यज्ञानत्वादृशतद्विषयकप्रत्यक्षत्वेननकार्यकारणभा
वइतिभावः॥परामर्शत्वघटकदलचतुष्टयस्यसामादर्शनायचैत्रावलोकितेत्यादिचतुष्कं॥नीलेतरघटतद्विषयकत्वा
दिनेत्यत्रापिइदंद्वात्मरत्वप्रत्ययस्यघटेनापिसंबंधः॥ननुप्रामाणिकतयागौरवंनदोषायेत्यतआह॥मानाभावादिति
॥ननुतादृशकार्यान्यथानुपपत्तिरेवमानमतआह॥अन्यथोपपत्तेश्चेति॥विशिष्टस्मरणइति॥व्याप्तिप्रकारकपक्ष
धर्मतास्मरणइत्यर्थः॥यद्यप्यप्रामाण्यज्ञानास्कंदितेनापिस्मृतिजननात्॥तदनास्कंदितत्वंनस्मृतिजनकतावच्छेद
कं॥परमर्शस्यानुमितिजनकतावच्छेदकं॥परामर्शस्यानुमितिजनकतायांतुतत्ववच्छेदकमेवेतिनातिव्याप्तिसंभाव
नातथापितत्रज्ञानीयाप्रामाण्यज्ञानाभावस्यसर्वत्रनिश्चयकारणतावच्छेदकत्वेविनिगमनाविरहेणस्वातंत्र्येणहे
तुत्वस्यैवोचितत्वमित्याशयात्॥अप्रामाण्यंभ्रमत्वंप्रामाण्याभावोवानचैवमेकस्मिन्ज्ञानेअप्राण्यज्ञानेसतिप्रतिबं
धकसत्वात्॥तदनास्कंदितज्ञानांतरादपिनानुमितिस्यादिष्टत्वात्॥अतएवाप्राप्यज्ञानानामननुगमेपिनक्षतिः॥यादृशाप्र 

एयज्ञानसत्त्वे परामर्शांशत्वेनानुमितिस्तादृशज्ञानाभावस्यैकस्यैव हेतुत्वात्॥ अन्यथा तत्पुरुषीयाप्रामाण्यज्ञानाविष
यपरामर्शत्वादिना हेतुत्वेऽनंतकार्यकारणभावकल्पनापातात्। प्रमेयज्ञानमप्रयेत्यप्रामाण्यधीसत्त्वेनुमित्यनुदय
प्रसंगाच्च॥ यत्र विषयविशेषपरामर्शेऽप्रामाण्यज्ञानाभावस्तदभिप्रायेणेदमिति कश्चित्॥ यद्युपेक्षात्वं चेदेकनि
र्वक्तुं शक्यते तदा तदन्यत्वेन हेतुत्वं वक्तुं शक्यत इत्यतस्तदेव दूषयति॥ उपेक्षात्वमिति॥ जातिसंकटेति॥ जगन्नाथा
दिचाक्षुषोपेक्षात्वं विहाय चाक्षुषत्वं॥ तच्च विहायोपेक्षात्वं त्वाचादौ वर्तमानमेकत्र चाक्षुषोपेक्षाज्ञाने संकीर्णमित्य
र्थः॥ ननु चाक्षुषत्वादिव्याप्यं नानैवोपेक्षात्वं तावत् भेदकूटस्य कारणतावच्छेदकोऽतो न दोष इत्यत आह॥ आंशिक
त्वेति॥ एकमेव ज्ञानं किंचिदंशे अपेक्षात्मकं किंचिदंशे उपेक्षात्मकं चानुभूयत उपेक्षात्वस्य जातित्वे तन्न स्यात् जातेर
नांशिकत्वादिति भावः॥ प्रवृत्तिनिवृत्त्यजनकस्यापि जिज्ञासितविषयस्यानुपेक्षात्वादाह॥ अजिज्ञासितेति॥ तद्वि
षयकजिज्ञासाजनकज्ञानत्वमित्यर्थः॥ तेन कालांतरे जिज्ञासितविषयस्यापि ज्ञानस्य नोपेक्षात्वक्षतिः॥ तादृशा
त्तद्रूपावच्छिन्नात्॥ संस्काराजनकत्वं उपेक्षात्वमिति शेषः॥ तज्जनकतावच्छेदकेति॥ तज्जनकतावच्छेदकाग्रहे जन
कताग्रह एवासंभजनकतावच्छेदकांतरं च नास्ति भावः॥ ननूपेक्षात्वेनैव तद्गृह्यतामत आह॥ अन्यान्याश्रयादिति

॥संस्कारजनकभिन्नत्वरूपेणोपेक्षात्वे ज्ञाते उपेक्षान्यत्वेन संस्कारजनकत्वे च ज्ञाते तदन्यत्वरूपमपेक्षात्वं ज्ञातव्यमित्य
न्योन्याश्रय इत्यर्थः॥रूपांतरापरिचयादिति पाठः अन्योन्याश्रयादित्यत्र हेतुः रूपांतरं उपेक्षान्यत्वादतिरिक्तं॥ननु
घटत्वप्रकारकैतद्घटविषयकज्ञानस्य तादृशसंस्कारं प्रति तद्व्यक्तित्वेन जनकतां गृहीत्वा तादृशसंस्कारजन
कतावच्छेदककूटवत्त्वमपेक्षात्वं स्वरूपमेव अन एव नातिरिक्तत्वक्षतिः॥एतद्घटांशे उपेक्षात्मकस्यापि ज्ञानस्य पर
दे घटांतरे वा अपेक्षात्वसंभवात्॥ननु घटत्वप्रकारकैतद्घटविशेष्यकसंस्कारत्वावच्छिन्नं प्रति तद्व्यक्तित्वेन प्र
तिबंधकत्वं कल्प्यं॥तथासति उपेक्षाज्ञाने विद्यमाने पेक्षाज्ञानांतरादपि तादृशसंस्कारानुत्पत्त्यापत्तेः॥तथा च घ
टत्वप्रकारकैतद्घटविषयकसंस्कारजनकतावच्छेदककूटवद्भिन्नत्वेन न जनकत्वेन कोपि दोष इत्यत आह॥
संस्कारानुत्पत्त्यैवेति॥अस्मरणसंभवे। उपेक्षणीयास्मरणसंभवे॥तदप्रवेशात्॥उपेक्षान्यत्वाप्रवेशात्॥न च स्मृ
तिं प्रत्येव तत्त्वेन हेतुत्वमस्तु संस्कारं प्रति तत्सामान्यरूपेणैव तदस्त्विति वाच्यं॥तथासति अपेक्षास्थले संस्कारव्यक्ते
स्तन्नाशकस्य कल्पनागौरवात्॥न चैवं तुल्यनायतया संस्कारानुत्पत्त्यैव संग्रहयात्स्मृत्यनुत्पत्तिसंभवस्मृति
जनकतायामपि न निश्चयत्वप्रवेश इति वाच्यं॥अतंताजनकव्यावृत्तरूपे संभवति तत्साधारणरूपेण कारणता २६

याऽनन्यायत्वात्॥अन्यथाज्ञानत्वेनैवहेतुतास्त्कसंस्काराभावादेवस्मृत्यभावइत्यस्याभिस्कचत्वात्॥नचैवंतुल्य
व्यायेनोपेक्षान्यत्वस्यापिप्रवेशइतिवाच्यं॥उपेक्षात्वस्यतावत्भेदकूटरूपस्यसर्वज्ञपरिच्छेद्यत्तयातदन्यत्वस्य
दुर्ज्ञेयत्वात्॥तथाचेदंत्वावच्छेदेनघटत्वप्रकारकसंस्कारंस्मृतिंचप्रतिइदंत्वावच्छेदेनविरोधसंबंधेनघटत्वाभ
वाप्रकारकेदंत्वावच्छिन्नघटत्वप्रकारकज्ञानत्वरूपनिश्चयत्वंजनकतावच्छेदकं॥अतएवद्रव्यंघटोनवाऽयं
घटइतिसमूहालंबनस्यायंघटोघटत्वाभाववांश्चेतिसमकश्चयस्यापिसंग्रहः॥संशयस्थलेतत्करूपजनकतावच्छे
दकाभावात्तादृशसंस्कारस्यस्मृतेश्चानुत्पादइति॥यत्तुस्मृतिप्रत्येवोक्तरूपेणहेतुतासंस्कारंप्रतित्विदंत्वावच्छे
देनघटत्वप्रकारकधीत्वेनैवहेतुता॥अन्यथायंघटोनवेतिसंशयानंतरंकेवलधर्मिस्मरणानुपपत्तिः॥त
थाचसंशयस्थलेइदंत्वावच्छेदेनघटत्वप्रकारकसंस्कारसत्वात्तथास्मृतिवारणायतज्जनकतायांनिश्च
यत्वंनिवेश्यतइति॥तन्न॥धर्मिस्मरणान्यथानुपपत्त्याधर्मितावच्छेदकप्रकारेणधर्मिविषयत्वेपिसंस्कार
स्यधर्मितावच्छेदकावच्छेदेनघटत्वप्रकारकत्वकल्पनेमानाभावात्॥अन्यथासंस्कारएवनिश्चयत्वेनहे
तुतास्तुस्मृतौतुज्ञानत्वेनेत्येवकिंनस्यात्॥शुध्धधर्मितावच्छेदकप्रकारकसंस्कारंप्रतिशुध्धधर्मितावच्छेद

कप्रकारकज्ञानत्वेनैवपृथगेवहेतुतायाःसर्वसंमतत्वेनैवधर्मिस्मरणोपपादनात्॥नचैवंअयंघटोनवेतिसंशया
त्केवलधर्मिणइवकेवलघटस्यापिस्मरणापत्तिः॥तत्रापिधर्मितावच्छेदकामिश्रितघटइत्येवमाकारकघटत्व
प्रकारकज्ञानानुरोधेनघटत्वप्रकारकज्ञानत्वेनसप्रकारकजंन्यज्ञानत्वेनवापृथगेवहेतुतायाअवस्यवा
च्यत्वादितिवाच्यं॥इष्टत्वात्॥यदपिसंस्कारस्यापूर्वस्येवसविषयकत्वेमानाभावः॥स्मृतित्वेनसंस्कारत्वेनै
वकार्यकारणभावः॥संस्कारत्वावच्छिन्नंप्रतिज्ञानत्वेनसप्रकारकजन्यज्ञानत्वेनैवहेतुत्वात्तदुपेक्षायामापू
र्तयेतत्तद्व्यक्तित्वेनहेतुत्वस्योभयमतेप्यादरणीयत्वाच्चनातिप्रसंगः॥व्यापारव्यापारिणोरेकमेवजन्यतावच्छे
दकमित्यत्रमानाभावात्॥केवलघटत्वादिस्मृतिंप्रतिघटत्वप्रकारकधीत्वेनहेतुत्वान्नतुतत्रनिश्चयत्व
स्यापिनिवेशइत्युभयसिद्धमेव॥नचज्ञानत्वेनस्मृतित्वेनैवकार्यकारणभावोस्तुसंस्कारस्येदंत्वाव
च्छेदेनेत्थंरूपेणहेतुत्वाच्चनातिप्रसंगइत्येवकिंनस्यादितिवाच्यं॥संस्कारस्यसविषयकत्वासि
द्धेः॥ज्ञानसविषयकत्वस्यानुव्यवसायेनैवग्रहादिति॥तन्न॥घटपटसमूहालंबनस्यपटांशे॥उपेक्षा
त्मकस्यघटांशेऽपेक्षात्मकस्यस्वजन्यसंस्कारसंबंधेनसत्वात्सटस्मरणापत्तेः॥नचतदुद्बोधकाभावा

दस्मरणं ॥ यस्यपुरुषस्यपटसंस्कारानंतरंपटसदृशाविलक्षणवस्तुज्ञानानंतरमेवावश्यंपटस्मृतिस्तत्र
तत्पुरुषांतरीयपटस्मृतिस्तत्रतत्पुरुषांतरीयपटस्मृतिंप्रतितादृशवस्तुज्ञानत्वेनहेतुत्वेउद्बोधकाभावस्या
संभवात् ॥ एवमेकस्मिन्नेवघटेघटत्वद्रव्यत्वोभयप्रकारकज्ञानात्घटत्वांशेऽपेक्षाकातद्रव्यत्वांशेऽनपे
क्षात्मकातद्रव्यत्वप्रकारकस्मृत्यापत्तिवारणायसंस्कारस्यसप्रकारतापिकल्पनीयेति ॥ एवंचोक्तस्थले
तिप्रसंगवारणायसंस्कारस्यतत्तत्प्रकारकतत्तद्विषयादिघटितरूपेणजनकत्वेज्ञानस्याज्ञानत्वेनस्मृतिजे
नकार्यकारणभावःकल्प्यतेनतुविशेषणरूपेणापिप्रयोजनाभावादितितुयुक्तःपंथाः ॥ तथाचस्मृतिज
नकत्वं ॥ सकृदिति ॥ असकृदनुभवेचएकसंस्कारनाशेऽपिसंस्कारांतरंसंभवतीतिभावः ॥ ननुसंस्कारस्य
फलनाश्यत्वेनप्रथमस्मरणेनैवसमूहालंबनसंस्कारस्यनाशादनंतरंतद्विषयांतरस्मरणानुपपत्तिरत
तआह ॥ समानाकारेतिघटत्वप्रकारकसंस्कारंप्रतिघटत्वप्रकारकसंस्कारंप्रतिघटत्वप्रकारकस्मृ
तित्वेनपटत्वप्रकारकस्सकारंप्रतिपटत्वप्रकारकस्मृतित्वेननाशकत्वकल्पनात् ॥ घटत्वप्रकारकस्मृ
तिसत्वेऽपिपटत्वप्रकारकस्मृत्यभावात्तदुभयप्रकारकसंस्कारस्यादित्यर्थः ॥ अत्रस्मृतिजन्यसंस्कारस्य

क्षणिकत्वापत्तिवारणायतत्तत्स्मृजनकत्वंतत्तत्स्मृतिनाश्यतायांप्रत्यासत्तिरितिध्येयं॥समूहालंबनादित्यादि
नाएकधर्मिविशेष्यकानेकप्रकारकज्ञानसंग्रहः॥ननुयत्रक्रमिकमेवस्मरणंनतुसमूहालंबनात्मकंत
त्रतादृशसंस्कारस्यानापत्त्याकालादेरेवनाशकत्वंकल्प्यंतथाचफलमात्रस्यत्वेव्यभिचारः॥तत्तद्व्यक्तित्वेनना
शकत्वकल्प्यतेचसकृदनुभूतस्यलेपिचरमफलमेवनाशकस्त॥वस्तुतस्तुकालादेविवतत्तद्व्यक्तित्वे
ननाशकत्वमनन्यातिकत्वात्स्मृतौतुसंस्कारनाशकतावच्छेदकत्वेनैकाजातिरेवचरमफलमात्रवृत्तिः
स्मृतित्वव्याप्याकल्प्यतेतथाचोपधायकतासंबंधेनविजातीयस्मृतिविशिष्टसंस्कारनाशंप्रतिविजा
तीयस्मृतित्वेनहेतुता॥अतएवविजातीस्मृत्येतिजन्यसंस्कारस्यकालांतरजावितियस्मृत्यकस्यापिक
तातदानींतस्यतदुपधायकत्वाभावेनतद्विशिष्टत्वाभावात्‌अतएवअत्रस्यनायांतत्तत्स्मृतिजनकत्व
मपिनप्रत्यासत्तिरक्तस्येतिप्रसक्तत्वादतआह॥जायतेचेति॥अस्त्विदिमिडितिस्मरणादिनाकार्येणा
नुमितःदृढत्वनामासंस्कारवृत्तिजातिविशेषः॥तद्वच्छिन्नेचान्वयव्यतिरेकाभ्यांपुनःपुनःस्मरणमेव
कारणंतत्रपूर्वपूर्वस्मरणंसंस्कारद्वाराइतत्वसाक्षादेव॥अतएवभावनायापटुतरभावनाजनकत्वंमेनि

रेभाष्यकृतः॥नचकस्यचित्स्मृतिद्वयेनकस्यचित्स्मृतित्रयेणदृढतरसंस्कारइत्यननुगमः॥तत्पुरुषीयता
दृढसंस्कारंप्रतितत्तत्स्मृतिनामपितत्वेनहेतुत्वकल्पनादितिस्मृतिनिष्ठाजातिविशेषएवतादृशसंस्कारजन
कतावच्छेदकइत्यपिकश्चित्॥नन्वेकस्यैवसंस्कारस्यपुनःपुनःस्मृतिजननानंतरंझटित्युद्बोधकास
मवधानमेवदार्ढ्यंतावतैवझटितिसंस्मरणसंभवात्तथाचतादृशजातौमानाभावइत्यतआह॥परित्य
ज्यचेति॥अनुभवंविनापिस्मृतितःसंस्कारसंभावनाविरहात्॥ज्ञानत्वंनिश्चिताव्यभिचारकमितिव्य
भिचारज्ञानरूपप्रतिबंधकाभावात्॥तदवच्छेदेनैवहेतुतानिश्चयइतिभावः॥इदमेवनिश्चिताव्यभिचा
रकत्वमेवहेतुतावच्छेदकत्वमिति॥कार्यतावच्छेदकंतुविशेष्यरूपमेवनिश्चिताव्यभिचारकनतुसंदि
ग्धव्यभिचारकंसामान्यरूपं॥अतएवविशेषणाधीजंन्यतावच्छेदकंविशिष्टानुभवत्वमित्युपाध्या
याः॥नचापसिद्धांतइत्यतआह॥अभिहितंतेत्वे॥तत्रपूर्वपूर्ववर्णस्मृतिसहितांत्यवर्णानुभवए
पदप्रत्यक्षेहेतुरस्त्वित्यापेक्षौस्मृतिनामित्यादिसमानाधानफक्किका॥स्वकार्योयःसंस्कारःतत्कृतो
योविरोधोनाशस्तद्दृतीनामित्यर्थः॥अनुभवपरत्वादिति॥केचित्तुयत्रएकस्मिन्नपिघटेअयंघट

इतिप्रत्यक्षानंतरंदिवसादिविलंबेननायंघटइत्यनुमित्यादिकं॥उत्पन्नंतत्रतादृशसंस्कारंस्मृतिंचप्रतीतिंचनिश्चयत्वे
नहेतुत्वविवक्षणेपितादृशनिश्चयद्वयजनितसंस्कारद्वयसत्वात्संशयात्मकस्मृत्यापत्तिरस्तथाविधस्मृतिवारणा
येदंत्वावच्छेदेनघटत्वप्रकारकस्मृतिंप्रतिइदंत्वावच्छेदेनघटत्वाभावप्रकारकस्मृतिसामग्र्याःएवंतादृशघट
त्वाभावप्रकारकस्मृतिंप्रतितादृशघटत्वप्रकारकस्मृतिसामग्र्याःप्रतिबंधकत्वमवश्यंवाच्यं॥तथाचस्मृतिज
नकतायांसंस्कारजनकतायांचनिश्चयत्वाप्रवेशेपिनक्षतिः॥नचतत्रानुमित्यादिनापूर्वसंस्कारोनाश्यतेअनु
मित्यादेस्तादृशप्रत्यक्षाविरोधित्वेनतज्जनितसंस्कारानाशकत्वादित्याहुः॥साक्षात्जन्यत्वंस्वाव्यवहित
प्राक्कालवृत्तित्वप्रत्यासत्त्यातादृशपरामर्शजन्यत्वं॥तेनसिध्यादिनाशकालीनोनविशेषणज्ञानतयापरामर्श
जन्यत्वसंभवेपिततसंस्कारएवप्रत्यासत्तिःनततादृशप्राक्कालवृत्तित्वमितिप्रसंगः॥अत्रानुमत्वापेक्षयागौ
रवमेवास्वरसः॥प्रकांतरेणापिस्मरणातिव्याप्तिवारणप्रकारंदर्शयति॥किंचेतितदुत्तनयवैशिष्ट्येति॥व्याप्तिप्रका
रेणधूमेपर्वतनिरूपितानाद्यांपर्वतत्वरूपेणपर्वतेव्याप्यनिरूपितापारत्ताख्यावाअवगाहित्वंवाच्यं॥तेनप्रमेयमि
तिज्ञानस्यव्याप्यपर्वतइत्यादेश्चवारणंआधेयताधारतयोश्चसमानसंवित्संवेद्यत्वाददोषः॥व्याप्तिप्रकारेणधूमे

पर्वताधेयत्वावगाहित्वस्यपर्वतत्वरूपेणपर्वते वन्हिव्यापारधारत्वावगाहित्वस्यचान्यतरदेववादेहेतुतावच्छेद
कं॥लक्षणघटकमपिति॥अन्यथासंभवापातात्॥तद्देवताद्दशवैशिष्ट्यावगाहिज्ञानत्वावच्छिन्नहेतुत्वमेव॥न
नुस्मृतावप्युक्तरूपेणकुतोनहेतुतेत्यतआह॥एकतरेति॥पर्वतेवन्हिव्याप्यइतिज्ञानात्पर्वतोवन्हिव्याप्य
वानितिस्मरणादित्यर्थः॥अन्यथानुमिताविवस्मृतावपि उभयवैशिष्ट्यावगाहित्वेनहेतुत्वे॥अनियमेन॥विशे
ष्यानियामककार्यकारणभावरूपनियमविरहेण॥एकविशेष्यकस्मृतिसामग्र्याएवान्यविशेष्यकस्मृतिसाम
ग्रीत्वात्॥नियमेननियमतः उभयविशेष्यकतापत्तेरित्यर्थोवा॥ननुतद्विशेष्यकतत्प्रकारकस्मृतिंतत्प्रकारक
तद्विशेष्यकधीत्वेनहेतुत्वं॥अतएवस्मृतेनैम्नियविशेष्यकत्वं॥एवमुक्तउभयवैशिष्ट्यावगाहित्वेनापिसामान्येनहे
तुतायद्विशेषयोरितिन्यायात्अतआहसमानप्रकारकत्वेनैवेति॥तथाचतासामान्यहेतुतयैवयद्विशेषयोरि
तिन्यायस्यचरितार्थत्वान्नतद्ग्राहित्वबलात्उभयवैशिष्ट्यावगाहित्वेनहेतुत्वमितिभावः॥केचित्तुएकतरविशेष्य
कज्ञानादन्यतरविशेष्यकस्मृतिस्वीकारेसमानप्रकारकत्वेनज्ञानस्मरणयोःकार्यकारणभावभंगप्रसंगइत्या
शयेनाहसमानप्रकारकत्वेनैवेतिव्याचक्रुः॥तत्रस्मृतौविशिष्येवतत्प्रकारकतद्विशेष्यकत्वादिनैव॥एवकारव्यव

ध्यमाह॥ नतत्क्रूरूपेणेति॥ तदनुभववैशिष्ट्यावगाहित्वेनेत्यर्थः॥ एवं च तज्जन्यवैशिष्ट्यावगाहित्वेन हेतुत्वविवक्षणेन च
॥ विशिष्टवैशिष्ट्यबोधादावित्यादिना तादृशपदार्थोपस्थितिजन्यशाब्दबोधपरिग्रहः॥ हेतुतामते चेत्यनेन सर्वैकास्व
रसः सूचितः॥ निनरामिति॥ नातिव्याप्तिशंक — त्यनेनान्वयः॥ तत्र हेतुमाह॥ तथैवेति॥ तादृशरूपावच्छिन्नहेतुत्व
स्यैवेत्यर्थः॥ पर्वते वन्हिव्याप्य इत्यनुभवस्य पर्वतो वन्हिव्याप्यवानिति स्मृतिसमानविषयत्वसत्त्वात्ततस्तदुत्पत्तिसं
भावनयातिव्याप्तिशंका कादाचित्स्यात्॥ न च धूमाभावव्यापकाभावप्रतियोगिधूमवान्पर्वत इत्यनुभवस्य वन्हिव्याप्य
वान्पर्वत इति स्मृतिभिन्नविषयकतया ततस्तदुत्पत्तेरत्यंतासंभवित्वेन स्मृतौ तेन रूपेण हेतुत्वस्यासंभवा
दितिव्याप्तिशंकस्यदमपि नेति भावः॥ उक्तरूपेण हेतुत्वस्य लक्षणे निवेशादेव॥ व्याप्यवत्पक्षादीत्यादिना पक्ष
विशिष्टव्याप्यस्य परिग्रहः॥ व्याप्यविशेष्यकपरामर्शस्य हेतुतावादिनये पर्वते वन्हिव्याप्य इति ज्ञानत्वेनैव हे
तुत्वादिति भावः॥ येषां मते विशिष्टवैशिष्ट्यबोधत्वावच्छिन्नं प्रति विशेषणतावच्छेदकप्रकारकनिश्चयत्वेन न हेतुत्वं त
न्मतेप्यभावप्रत्यक्षे प्रतियोगितावच्छेदकप्रकारकप्रतियोगिनिश्चयत्वेन हेतुत्वं वाच्यं॥ तथा च तदादाय तादृशाभाव
प्रत्यक्षेतिव्याप्तिः स्यात् सापि प्रकृतविवक्षया न संभवतीति भावः॥ हेतुत्वेपीत्यपिकारोऽस्वरसस्सूचनाय॥ तद्बीजं तु ३०

प्रतियोगिधियोजन्यतायांनाभावप्रत्यक्षत्वमवच्छेदकंइदंत्वादिनातत्प्रत्यक्षेव्यभिचारात्॥नापिघटत्वरूपेण
प्रतियोगितासंबंधेनघटप्रकारकाभावप्रत्यक्षत्वंतथाप्रमानाभावात्॥वस्तुतस्तत्प्रतियोगिज्ञानाभावदशा
यांतत्सत्वेपिवाअभावत्वावच्छेदेनधीयत्वाभावसंसर्गग्रहेणनेत्याकारकप्रत्ययप्रसंगः॥तथाचतत्तदिंद्रि
यसंबंधविशेषणतायाःघटत्वविशिष्टवैशिष्ट्यावगाह्यभावप्रकारकप्रत्यक्षत्वं॥पटत्वविशिष्टवैशिष्ट्यावगा
ह्यभावप्रकारकप्रत्यक्षत्वइदंत्वेनाभावेप्रत्यक्षोपगमेचइदंत्वप्रकारकाभावप्रत्यक्षत्वेनानैवकार्यतावच्छेदकंअ
तएवविशेष्यविशेषणमितिन्यायेनापिनाभावधीःअतएवविशिष्टवैशिष्ट्याबोधसामान्यहेतोरेवतद्धुत्यतोन
पृथक्कार्यकारणभावकल्पनेतिध्येयं॥नन्वाधारत्वाधेयत्वयोःसमानसंवित्संवेद्यत्वेमानाभावः॥तादृशज्ञान्य
तरत्वगौरवादेवजनकतावच्छेदकमतोवन्हिव्याप्यवान्पर्वतःपर्वतवन्हिव्याप्यइतिज्ञानयोःप्रातिस्विकरूपे
णैवहेतुत्वंवाच्यं॥तथाचातिप्रसंगस्तदवस्थएवेत्यतआह॥व्याप्यविषयकत्वेनेति॥एतेनव्याप्यविषयक
त्वविवक्षणेजन्यविशिष्टज्ञानत्वावच्छिन्नंप्रतिविशेषणधियोहेतुत्वस्थापनेऽवश्यापेक्ष्यविशेषणतावच्छे
दकप्रकारकत्वसत्वात्तादृशविशिष्टवैशिष्ट्यबोधत्वावच्छिन्नंप्रत्यपिविशेषणतावच्छेदकप्रकारकधियोहेतु

त्वंव्यवस्थापयितुंस्यादित्यान्वयेनतत्रैवव्यभिचारंवारयति॥स्मृतिमित्यादिना॥क्वचित्स्वतः क्वचित्व्यापारतोऽप्यन्यवि
शिष्टज्ञानत्वावच्छिन्नंप्रतिविशेषणज्ञानस्याव्यवहितपूर्ववृत्तित्वमित्यर्थः॥विशेषणधियोहेतुत्वस्येत्यादिपष्ठ्यंतचतुष्टय
स्यकल्पनादित्यग्रेतनेनान्वयः॥ननुसंबंधभेदेनव्यापकताभेदात्नैकहेतुकं॥संस्कारस्यव्यापारतापिनसंभव
तिसंस्कारमजनयित्वापिविशेषणज्ञानेनविशिष्टज्ञानजननादतआह॥निर्विकल्पकात्मकस्येति॥तथाचसर्वत्रव
विशेषणधियःसाक्षाद्धेतुत्वमितिभावः॥ननुसमानप्रकारकसमानविशेष्यकत्वेनैवस्मृतिंप्रतिकारणत्वंज्ञा
नस्यक्लृप्तं॥निर्विकल्पकात्मकस्मृतिंप्रतिकारणतरस्यकार्यतावच्छेदकांतरस्यचकल्पनंगौरवपराहतं॥न
चघटत्वांशेऽन्याप्रकारकघटत्वविषयकंस्मृतिंप्रतितादृशघटत्वधीत्वेन॥संबंधविधयासमवायस्मृतिंप्रतिता
दृशासमवायविषयकधीत्वेन॥घटविषयकस्मृतिंप्रतिघटधीत्वेनचकार्यकारणभावकल्पनात्॥घटत्वप्र
कारकघटविशेष्यकस्मृतित्वेनकार्यतावच्छेदकमतोनिर्विकल्पात्मकंस्मरणंनानुपपन्नमितिवाच्यं॥एक
स्यघटस्यघटत्वेनघटांतरस्यद्रव्यत्वेनैवग्रहेघटांतरविशेष्यकघटत्वप्रकारकस्मरणापत्तेरतआह॥अनुभ
वमिति॥तथाचविशिष्टानुभवत्वंजन्यतावच्छेदकमितिनस्मृतौव्यभिचारइतिभावः॥तस्माद्विशेषणधियःनिय ३१

मतो विषयस्मृतेरिति॥ अपेक्षाबुध्यात्मकज्ञानेन नचेछादिकं नजन्यत इत्याशयः॥ साध्यादेरित्यादिना पक्षहेतुहेतुतावछे
दकसंवंधसाध्यतावछेदकसंवंधपरिग्रहः॥ देवादिति॥ सप्तमां वन्हिव्यापानुमिछायांवन्हिव्याप्यवांश्चपर्वत इत्याका
रकपरामर्शात् जातायांपर्वतोवन्हिमांश्चेत्यनुमितावित्यर्थः॥ तस्मांत द्वामिप्रकारकपक्षधर्मतानिश्चयजन्यायां॥ सा
पिव्याप्तिरपि॥ अनुभवत्वव्यापत्वंतन्फनवृतित्वं॥ तत्वानुभवनिष्ठभेदप्रतियोगितावछेदकत्वं॥ एवंच॥ अनुभवत्व
व्याप्यजातिमत्वविवक्षणेच॥ अनुभवत्वव्याप्यत्वापेक्षपालाघवार्थमाह॥ पर्वतवन्हीति॥ प्रागुक्तयुक्तातन्म
यैवैशिष्ठयावगाहित्वस्यकारणतानवछेदकत्वादाह॥ वनिव्याप्यवत्पर्वत इति॥ प्रतियोगिकांतंतत्पतंचका
र्यतायां विशेषणं॥ अवछेदकत्वमवछेदकताश्रयत्वंनत्ववछेदकत्वपर्याप्त्याधिकरणत्वं॥ अवछेदकताश्रयः
तादृशविशिष्टशरीरघटकपदार्थस्तामएवतथाचपर्वतविशेष्यकवन्हिप्रकारकानुमितित्वस्यावछेदकत्वेव
न्हित्वादेरपितद्घटकतया तद्वापतिव्याप्तिरतोनवृतिरितिज्ञानसमवेतेत्यर्थः॥ आलोकादिलिंगकानुमितिव्या
वृत्तस्यवन्हिव्याप्यधूमवान्पर्वत इत्येतादृशपरामर्शाव्यवहितोत्तरतादृशावन्ह्यनुमितित्वस्यकार्यतावछेदक
त्वेतत्घटकज्ञानत्वमादायज्ञानमात्रेऽतिव्याप्तेराह॥ सामानाधिकरण्येनेति॥ ज्ञानत्वस्यकार्यतासामानाधिकर

ण्यसत्वेपिसामानाधिकरण्यसंबंधेननावच्छेदकत्वं।।किंत्वव्यवहितोत्तरत्वपरिचायकपरामर्शघटकतया।।अ
नुमितित्वस्यचताद्दशसंबंधेनैवावच्छेदकत्वं।।ताद्दशानुमितिःकार्यैतिकार्यताग्रहेसामानाधिकरण्यसंबंधेनै
वतत्वस्यावच्छेदकत्वावगाहनादितिभावः।।व्याप्यविषयकेसत्त्राखंडाभावघटकतयावयर्थ्याभावेपितदपेक्षया
लाघवादाह।।व्याप्तिज्ञानइति।।व्याप्तिज्ञानेऽवश्यंभासमानंसाध्यमपितितद्विषयकत्वोपादानेऽसंभवइत्यतस्ता
दृशानुमित्यविषयइति।।तद्व्याप्तिपरामर्शाधीनानुमित्यविषयोघटादिस्तद्विषयकत्वेताद्दशविशिष्टवैशिष्ट्यवो
धेतिव्याप्तिरतःपूर्वप्रतिकःस्तथाचाभावाविषयकत्वंहेत्वविषयकत्वंवाच्यमित्यर्थः।।ननुपर्वतोवन्हिमानि
त्यनुमितित्वावच्छिन्नंप्रतिपर्वतोवन्हिव्याप्यधूमवानितिपरामर्शत्वेननजनकतावन्हिव्याप्यतद्रूपवाननिपर्वतइ
तिज्ञानजन्येव्यभिचारात्।।नापिवन्हिव्याप्यधूमवान्पर्वतइतिपरामर्शाव्यवहितोत्तरताद्दशानुमितित्वंतत्कार्यताव
च्छेदकं।।अव्यवहितोत्तरत्वंहिताद्दशपरामर्शाधिकरणकालध्वंसाधिकरणत्वेसतिताद्दशपरामर्शध्वंसाधिकर
णत्वंतच्चाप्रसिद्धं।।कालमात्रस्यैवताद्दशध्वंसाधिकरणकालध्वंसाधिकरणत्वात्।।अदिनोत्यसारेअनंताना
मेवताद्दशपरामर्शानांनाशात्।।तत्परामर्शव्यक्त्यधिकरणकालध्वंसाधिकरणत्वेसतितत्परामर्शव्यक्तिध्वंसाधि

करस्कालध्वंसानधिकरणत्वरूपे अव्यवहितोत्तरत्वे कार्यतावच्छेदकामतः परामर्शत्वस्यानुमितित्वस्य च कार्यका
रणतयोरवच्छेदकत्वे मानाभावः॥ न च तत्तदव्यवहितोत्तरत्वसंबंधेन सामानाधिकरण्यविशेषितेन परामर्शवद
नुमितित्वमेतथ्यातादृशमेकपदार्थघटिताव्यवहितोत्तरत्वस्य संबंधत्वे मानाभावात्॥ न चैककालावच्छेदेनैका
त्मवृत्तित्वप्रत्यासत्त्या परामर्शविशिष्टानुमितित्वं तथा॥ क्षणद्वयात्मकः कालो धर्तव्योऽतो न विनश्यदवस्थपरा
मर्शजन्यानुमितिअसंग्रह इति वाच्यं॥ एतद्रूपलिंगकवन्ह्यनुमितिद्वितीयक्षणे तृतीयक्षणे वा धूमपरामर्शो
त्पादितादृशानुमितावपि तेन संबंधेन धूमपरामर्शवदनुमितित्वसत्वेन तत्र च परामर्शस्य हेतुत्वेन हेतुत्वेन हेतु
त्वेन व्यभिचारात्॥ स्वप्रागभावाधिकरणक्षणवृत्तिपरामर्शाधिकरणक्षणद्वयायावच्छेदेनैकात्मवृत्तित्वसंबंधत्वे
मानाभाव इति अस्वरसान्मूलोक्तं लक्षणं॥ उपेक्ष्य लक्षणांतरमाह॥ यां कांचिदिति॥ केचित्तु यत्र विषयवि
शेषे एकेन व्याप्येनैव व्यापकानुमितयस्तत्र तद्व्याप्यविशिष्टतादृशपक्षज्ञानत्वेन तत्पक्षकतादृशविष
यविशेषानुमितित्वेन कार्यकारणभावे बाधकाभावेन तदनुमितित्वमादाय जातिघटितमूलोक्तलक्षणमनाकु
लमित्याहुः॥ लिंगोपहितलैंगिकभानपक्षे वन्हिव्याप्यधूमवान् पर्वत इति परामर्शस्य वन्हिव्याप्यधूमवान् पर्वतोव

न्हिमानित्यनुमितित्वमेवकार्यतावच्छेदकं॥अतएवालोकपरामर्शजन्यानुमितौनव्यभिचारः॥तत्रवन्हिव्याप्यालोकवा
न्पर्वतोवन्हिमानित्याकारकानुमितेरंगीकारात्॥लिंगानुपधानपक्षपिर्वपतोवन्हिमानित्यनुमितित्वेनकार्यताव
न्हिव्याप्यधूमवान्पर्वतइतिपरामर्शत्वेनजनकतावन्हिमत्पर्वतस्यानुमितेश्चलिंगकततदनुमिति ,स्वरूपविष
यितैवकार्यतावच्छेदकसंबंधः॥अन्यवन्हितोतरत्वापेक्षयालघुत्वात्॥तत्स्वरूपस्यसंबंधत्वेनकल्पत्वाच्चातोनाले
कादिलिंगकानुमितौव्यभिचारः॥एवलोकादिलिंगकानुमितावपीत्यपिवदंति॥मानसत्वव्याप्यजात्यातिविशेषर
वपरामर्शत्वंअनुमितित्वावच्छिन्नजनकतावच्छेदकमितितुकश्चित्॥तन्नकचिदेवपक्षेकिंचिदेवसाध्यंअनुमि
तिविषयोनाघरइत्यत्रनिपामकालाभेवन्हिव्याप्यधुमवान्पर्वतइतिपराम्शादपिघटानुमितिप्रसंगात्॥नचपद
नुमितौघटपरामर्शःकारणंतादृशपरामर्शेघटस्यापिविषयत्वसंभवात्॥तदनुमितौतद्व्याप्यवत्पक्षज्ञानत्वेनविशि
ष्टहेतुत्वकल्पनेनैकिंपरामर्शत्वेनजात्या॥नचानुमितित्वावच्छिन्नंस्याकस्मिकतापत्तिः॥ज्ञानत्वेनैवतदवच्छिन्नं
प्रतिहेतुत्वस्यक्लृप्तत्वादिति॥तद्व्यक्ति॥श्टंगग्राहिकतयाअनुमितिव्यक्तिपरिग्रहः॥समवेतांतमन्यांतमसंव
तांतंचधर्मविशेषणं॥एतद्भावाभायेवधर्मपदं॥तत्रप्रत्यक्षत्वादिवारणायायाद्यं॥प्रत्यक्षत्वादेरपिकालिकसंबंधे

नअनुमितिवृत्तित्वात्॥समवेति॥अनुभूतवारणायद्वितीयं॥अत्रानुभवत्वंतद्व्यक्तित्वेनोपायतद्व्यक्तित्वावच्छि
न्नप्रतियोगिताकोभेदोविवक्षितः॥अन्यथानुभवान्यासमवेतसकलानुभवसमवेतत्वरूपानुभवत्वत्वप्रविष्टस
कलानुभवसमवेतत्वावच्छिन्नप्रतियोगिताकभेदस्यविवक्षितत्वेस्मृत्यादीनामपिवारणेऽनुभवासन्योभवेत्यस्य
वैयर्थ्यापात्तात्॥ज्ञानत्वादिवारणायतृतीयंविशेषणं॥अनुमितित्वस्यापिकालिकसंबंधेनानुभवान्यस्मिन्का
लादौवृत्तेरप्रसिद्धिरतोऽसमवेतेति॥तादृशधर्मस्यकालादावतिप्रसक्तत्वादाह॥समवायित्वादिति॥तथा
चसमवायत्समवायसंबंधेनतादृशलक्षणमितिभावः॥स्वर्गादिशाब्दबोधादौस्वर्गादिकमनुभवामीत्यनु
व्यवसायाभावात्॥प्रत्यक्षत्वादन्यतानुभवत्वंस्मृतिव्यावृत्तोनुभवव्यवहारःस्मरणान्यज्ञानत्वनिबंधनइति
मतेनआह॥अनुभवत्वजातीति॥तथाचनिष्प्रयोजकतयानुभवत्वान्येतिविहायस्मरणान्यज्ञानान्यासमवेत
त्वेगौरवात्॥स्मरणासमवेतत्वमेवोपादेयमितिभावः॥यद्यपिअनुभवत्वंजात्यनंगीकारेतितद्व्यक्तिसमवे
तप्रत्यक्षासमवेतधर्मसामा॥वापितत्वंलक्षणंसुवचमेवतथापिप्रत्यक्षादिप्रमितिचतुष्कस्यैवलक्षणमने
नोक्तं॥तद्व्यक्तिपदेनप्रत्यक्षप्रमितिव्यक्तिपरिग्रहेप्रत्यक्षमितेःएवंशाब्दव्यक्तिपरिग्रहेशाब्दस्याप्यनेनलक्षण

कथनसंभवात्॥एवमुपमितावपीतिभावः॥व्याप्तिज्ञानंकरणं॥परामर्शोव्यापारःव्यापारव्यापारिणोरेक
मेवजन्यतावच्छेदकंतथैवव्यापारव्यापारिभावसंभवादितिमतानुसारेणाह॥व्याप्तिज्ञानत्ववच्छिन्नेति
॥वन्हिव्याप्यधूमवत्पर्वतवानितिविशिष्टवैशिष्ट्यावोधत्वावच्छिन्नकार्यतावारणायव्याप्तिज्ञानत्वे
त्यादि॥व्याप्तिज्ञानत्वावच्छिन्नकारणतातत्प्रतियोगिककार्यतायांयदवच्छेदकंतदवच्छिन्नेत्यर्थः॥व्याप्तिज्ञा
नत्वावच्छिन्नकारणताप्रतियोगिकप्रक्षवृत्तिकार्यतावारणायविशिष्टपरामर्शत्वावच्छिन्नेत्यादि॥तत्रहि
व्याप्तिज्ञानत्वावच्छिन्नस्यकार्यतावच्छेदकंव्याप्तिविशिष्टज्ञानत्वंपरामर्शस्यतुतादृशविशिष्टवैशिष्ट्यज्ञा
नत्वमितिनैकमन्वयकार्यतावच्छेदकमितितदादायप्रत्यक्षादौनातिव्याप्तिः॥नचवन्हिव्याप्तिज्ञानस्यतद
व्यवहितोत्तरवन्ह्यनुमितित्वंवन्हिव्याप्यधूमवानिपर्वतइतिपरामर्शस्यतदव्यवहितोत्तरपर्वतविशेष्य
कवन्ह्यनुमितित्वंकार्यतावच्छेदकमित्यत्रापिनैकमवच्छेदकमितिवाच्यं॥वन्हिव्याप्योधूमःवन्हिव्याप्यरू
पविशेषवान्पर्वतइतिसमूहालंबनात्मकव्याप्तिज्ञानाव्यवहितोत्तरवन्ह्यनुमितौस्वजन्यपरामर्शसंबंधेन
धूमियव्याप्तिज्ञानाव्यवहितोत्तरवन्ह्यनुमितौस्वजन्यपरामर्शसंबंधेनधूमीयव्याप्तिज्ञानस्यव्यभिचारित २४

याकारणत्वाभावेनतज्जन्यतायामपितादृशधूमपरामर्शव्यवहितोत्तरतादृशवन्ह्यनुमितित्वस्यावच्छेदकत्वात्॥य
त्तुव्याप्तिज्ञानत्वावच्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकंवन्ह्यनुमितित्वं॥तदवच्छिन्नाततद्घटि
तधर्मावच्छिन्ना॥पर्वतविशेष्यकवन्ह्यनुमितित्वस्यपरामर्शजन्यतावच्छेदकस्यवन्ह्यनुमितित्वघटितत्वादि
तितन्न॥व्याप्तिविशिष्टवत्सर्वत्तवैशिष्ट्यस्यज्ञानत्वस्यतादृशपरामर्शजन्यतावच्छेदकस्यव्याप्तिविशिष्टज्ञा
नत्वरूपतादृशावच्छेदकघटितत्वादितिव्याप्तिरिति॥कश्चिदित्यस्वरसस्तद्बीजंतुव्याप्तिशरीरघटकतावस्तद
र्थानांस्मृतौविषयेविशेषणमितिरीत्यत्रपरामर्शस्तत्रव्यभिचारात्॥व्याप्तिजानत्वेनकारणतेवन॥एवमव्यहि
ताततरस्यतत्तव्यक्तिविश्रांततयाकार्यतानवच्छेदकत्वात्परामर्शत्वमपिनजनकतावच्छेदकमित्यादि॥प
क्षधर्मतेति॥पक्षत्वस्यविशेषणत्वेचविशेष्यान्वयिनान्वयित्वंपक्षधर्मताज्ञानेसत्त्वज्ञानमेवपक्षतायाः
परंपरयाविषयं॥तदन्वयीजन्यतातत्रपक्षताप्यन्वयः॥तात्पर्यवशाच्चज्ञानेसाक्षादन्वितस्यधर्मतादेरवि
शेषणत्वेपिधर्मताविशेषणपक्षविशेषणीभूतपक्षतायाअपिविशेषणत्वेनजन्यतायामप्यन्वयः॥लोहि
तोष्णीषाऋत्विजःप्रचरंतीत्यादौउष्णीषस्यप्राधान्यत्वादविवक्षितस्यापिविशेषणीभूतलोहित्यंविशेषणत्वेने

ष्टसाधनतान्वयीति भावः॥ पक्षधर्मतेत्यत्र लक्षणवाक्ये पक्षतासहकृतत्वसंबंधेन प्रथमज्ञाने विशेषणमित्यापिक
श्चित्॥ यथोक्तायाः सिध्धासिषाविरहविशिष्टसिध्ध्यभावरूपायाः कालाद्यतीन्द्रियपदार्थघटितत्वेन न प्रत्यक्ष
त्वमतो विशेष्येति॥ विशेषणवति विशिष्टाभावस्य विशेष्याभावरूपत्वादेव विशेष्यवति विशिष्टाभावस्य विशे
षणाभावरूपत्वात्॥ विशिष्टाभावस्यातिरिक्तत्वे यत्र विषयविषय विशेषे सिषाधयिषाप्रयुक्तो नानुमित्सत्वाद्
स्तत्र सिध्ध्यभावस्यैव पक्षतात्वात् एवं यत्र सिध्धिकाले सिषाधयिषाप्रयुक्तैवानुमितिस्तत्र सिषाधयिषाया एव
पक्षमात्वात्॥ तस्याश्च प्रत्यक्षजनकत्वादति व्याप्तिरिति परामर्शोपादानमिति भावः॥ तत्वेन॥ परामर्शत्वेन॥ तत्वेनेत्य
स्य फलमाह॥ बाधादीति॥ आदिना सत्प्रतिपक्षपरिग्रहः॥ तच्चानुमितिसामग्र्यभावसूचनाय॥ दैवात्तत्वसामग्रीव
शात्॥ प्रतियोगीति॥ सिध्ध्यभावप्रतियोगिसिध्धिविषयकेत्यर्थः॥ अत्र च सिध्धित्वप्रकारकसिध्धिज्ञानत्वे
न सिध्ध्यभावजन्यतावच्छेदकत्तल्लौकिकप्रत्यक्षत्वावच्छिन्नं प्रतिजनकत्वं मिश्रादीनां संमतं तत्त्वेनैकावच्छेदेनेत्य
स्य फलमाह॥ तदुभयसमूहालंबन इति॥ न च परामर्शप्रत्यक्षे परामर्शत्वेन हेतुकारणत्वाभावादेवावच्छेदेनेति
व्यर्थमिति वाच्यं॥ वन्हिव्याप्यधूमवान् पर्वतो नास्ति सिध्ध्यभावश्चेति समूहालंबनेतिव्याप्तिर्द्रष्टव्या॥ तच्चिन्त्यमिति॥ ३५

च्चिंता॥वीजंतुपरामर्शजन्यतावच्छेदककोटौतल्लिंगकत्वंनिविष्टंपक्षताजन्यतावच्छेदककोटौतन्निवेशनमफलं
॥यदिचविषयितासंबंधेनवच्छेदकस्यैक्यंविवक्ष्यतेतदानायंदोषः॥पर्वतोवन्हिमानित्यनुमितित्वंसिध्यभाव
स्यकार्यतावच्छेदकंवन्हिव्याप्यधूमवान्पर्वतइतिपरामर्षस्यकार्यतावच्छेदकंधूमलिंगकपर्वतोवन्हिमा
नित्यनुमितित्वं॥उभयत्रैववन्हिमत्पर्वतत्वस्यविषयतावच्छेदकत्वात्॥नचपक्षतावच्छेदकसामानाधिक
रण्येनसिध्यभावस्यकार्यतावच्छेदकंपक्षतावच्छेदकसमानाधिकरण्यमात्रावगाहिअनुमितित्वंपर्वतावा॥
वच्छिन्नसामानाधिकरण्येनपरामर्शस्यतुपर्वतविशेष्यकवन्ह्यनुमितित्वंपर्वतत्वावच्छेदेनवन्ह्यनुमितिसाधा
रणंपर्वतत्वावच्छेदेनवन्हिव्याप्यपरामर्शस्यापितत्सामानाधिकरण्यावगाहित्वेनव्यभिचाराभावादितिवाच्यं
॥अवच्छेदकावच्छिन्नसिध्यभावसामानाधिकरण्यावगाहिपरामर्शयोरेवप्रकृतेनिवेशात्॥पर्वतत्वसामा
नाधिकरण्येनवन्ह्यनुमितित्वस्यतदुभयजन्यतावच्छेदकत्वात्अनच्छेदकावच्छेदेनानुमितावपिसामानाधिक
रण्यावगाहित्वसत्वादितिदिक्॥व्याप्तिज्ञानत्वं॥व्याप्तिप्रकारकज्ञानत्वं॥पक्षधर्मतांशेव्याप्तिप्रकारकनिश्चय
त्वेनहेतुतायांव्याप्तिप्रकारकज्ञानत्वस्यापिनिवेशात्॥व्याप्तिज्ञानत्वंव्याप्तिप्रकारकपक्षधर्मतानिश्चयत्वमि

तिवार्थः॥ व्याप्तिप्रकारकज्ञानत्वादेर्लघुव्याप्तिप्रकारकज्ञानघटितत्वात्तस्यैव तादात्म्येन हेतुत्वमुचितमित्या
शयेनाह॥ तदात्म्येनेति॥ ननु व्याप्तेः साध्यसाधनाभेदेनाननुगतत्वाद्व्याप्तिज्ञानजन्यवृत्तितादृशजातिमत्करण
त्वस्य सकलव्याप्तिज्ञानस्यनिष्ठत्वात् भागासिद्धिवारणमेवाधिकं शब्दप्रयोजनं स्यादत आह॥ व्याप्तेरिति
॥ अधिकस्य तादृशजातिमत्करणत्वस्य॥ भागासिद्धिरिति॥ तच्चाव्याप्तिग्रहानौपयिकनवान तत्सार्थक
त्वमिति भावः॥ फलायोगव्यवच्छिन्नं कारणं करणमिति लक्षणाभिप्रायेणाह॥ फलोपहितस्येति॥ तथा
च फलानुपहितेपि व्याप्तिज्ञानत्वसत्त्वेन व्यभिचारवारणाय तादृशजातिमत्करणत्वं फलोपधानकं हेतु
कार्यमिति भावः॥ अनुमितिस्वरूपयोग्यलक्ष्यत्वे न क्षतिरिति आशयेनाह॥ करणत्वेति तथा च यन्निष्ठे
ति न्यायात् धर्मिभेदाद्वैयर्थ्यमिति भावः॥ ज्ञानत्वादीत्यादिना ज्ञानत्वपरिग्रहः॥ यद्यपि व्याप्तिज्ञानत्वमे
व करणत्वं॥ तस्य च व्याप्तिज्ञानत्वत्वेनैव व्याप्तिग्रहसंभवः॥ तथापि व्याप्तिज्ञानान्तरवृत्तिकारणान्तरस्य
प्रकृतविशेषणं विना व्याप्त्यग्रहात् तस्य सार्थकत्वमिति भावः॥ स्वरूपसंबंधरूपकारणताभिन्नेत्यपि वदं
ति॥ तादृशज्ञानत्वं परामर्शत्वं॥ तस्य कारणतानात्मकत्वात्॥ धर्मिभेद इत्यन्ये॥ धूमप्रागभाववत् धर्मि ३६

नेदपिवैयर्थ्यमितिमतेनाह॥व्यतिरेकेति॥हित्वभावनिरूपितसाध्याभावनिष्ठव्याप्तेर्ग्रातयाहेतौवैयर्थ्यशं
कानवकाशादितिभावः॥नित्यत्वेपीतियद्यप्यनित्यमपिसर्वंनस्वरूपतःप्रत्यक्षोपजीवकंतथाप्यदृष्टद्वाराऽनि
त्यमात्रस्यैवप्रत्यक्षोपजीवकत्वंसंभवतीतितथोक्तं॥ज्ञानाकरणकेति॥ज्ञानत्वत्वावच्छिन्नकरणताभाववत्
ज्ञानत्वं॥ज्ञानकरणकत्वव्यभिचार्यनुभवत्वव्याप्यजातिमत्वमर्थः॥अत्रानुमिनोमिनसाक्षात्कारोमीत्य
नुव्यवसायबलादनुमितेःप्रत्यक्षवैजात्येदसिद्धेतत्करणस्यापिवैलक्षण्यंसार्वजनीनमतोनुमितावुक्तल
क्षणातिव्याप्तिःफलवैजात्याधीनप्रमाणांतरत्वकल्पनस्यनापसदिकेत्यस्वरसःकश्चिदित्येनेनसूचितःसिद्ध
सिद्धिव्याघातादाहअनुमानत्वेनेति॥फ्रस्वार्थपरत्वेनानुमानपदंसंगमयति॥असदिति॥तन्मतेपदार्था
नामलीकत्वशक्तिरनुगताकारमात्रस्यैवालीकत्वादिति॥प्रमाणांतरत्वकल्पनस्यनापकादिकेत्यस्वरसः
कश्चिदित्यनेनसूचितः॥सिद्ध्यसिद्धिव्याघातादाहअनुमानत्वेनेति॥फ्रस्वार्थपरत्वेनानुमानपदंसंग
मयति॥असदिति॥तन्मतेपदार्थानामलीकत्वशक्तिरनुगताकारमात्रस्यैवालिकत्वादिति॥प्रमाणांतर
विषयस्वलक्षणविषयकत्वरूपसंवादोनसंभावनायामलीकविषयिण्यामतआह॥संवादेति॥यथाश्रुतत्यागे

वीजमाहसंभावितस्येति॥असत्वेहेतुरननुगताकारस्येति॥परमार्थसनयःस्वलक्षणःतन्मात्रविषकेयमित्यर्थः
॥स्वमसाधारणमनेकदेशकालावृत्तिस्वात्मकंतदेवलक्षणंव्यावर्तकंयस्यतन्मतेभेदेनधर्मिधर्मभावस्या
नभ्युपगमात्॥एतेनानुगतधर्मसंबंधेनतस्यव्यावृत्तकल्पेनसदसत्संबंधाभावात्कथंतस्यपरमार्थस
त्वमितिशंकानुकृता॥ननुतन्मतेनैतत्संवादलक्षणंपूर्वापराध्यक्षव्यक्त्योरैकैकस्वलक्षणविषयकत्वात्
जगतःक्षणभंगित्वात्॥किंचनिरुक्तसंवादस्यपरमार्थसद्विषयघटितमूर्तिकस्यविकल्पेनासंस्पर्शात्कथं
भ्रमोपीत्यतःतन्मतसिध्धंसंवादंएवोपपादयति॥अध्यक्षमूलकेति॥शशविषाणविकल्पनामनादिवासना
परीपाकमात्रमूलकानांवारणार्थमध्यक्षमूलकेति॥अत्रसंभावितस्येत्यनुषज्यते॥तथाचसंभावितस्या
ध्यक्षमूलकविकल्पोल्लिखितत्वात्संभावनायामध्यक्षमूलकविकल्पोल्लिखितविषयकत्वंसंवादइ
त्यर्थान्नपंचम्यनुपपत्तिः॥समयसंभावनयैवशाब्दोःप्रवृत्तिस्यादतउक्तंनिर्णयेति॥आदिनाआकांक्षा
तात्पर्यादिनिर्णयपरिग्रहः॥नाप्रत्यक्षप्रमाणमितिति॥तथाचस्वाभिमतस्यप्रत्यक्षातिरिक्तप्रमाणत्वाभावव्य
वस्थापनस्यानुगुणत्वेनैवानुगुणतेनैवानुमानाप्रामाण्यसाधनंचार्वाकस्येतिभावः॥अप्रमाणसाधर्म्यस्य ३७

प्रमाणसाधर्म्यत्वेनप्रमाणत्वाभावव्याप्यत्वेत्यतआह॥प्रमाणेति॥प्रमाणताप्रयोजकमिंद्रियत्वंव्याप्तिनि
श्चयत्वादिचैकतरसिध्धं॥तयाचसर्वव्यभिचारशंकोपवर्णनंनव्याप्तिनिश्चयाभावदर्शनद्वाराप्रमाणताप्रयो
जक[illegible]रूपपक्षधर्मत्वस्यसंपादनायैवेतिभावः॥दृष्टंसाध्यसाधनवत्तयानिश्चितंतस्यसाधर्म्यं
साध्यव्याप्यहेतुरूपंतस्यदृष्टंज्ञानमानंअतितत्वस्याविवक्षणान्नथाचज्ञायमानसाधर्म्यस्येतिवार्थः॥ज्ञानकर
णतापक्षमितिश्रित्यस्मरयति॥साध्यधर्म्यदर्शनस्यवेति॥अभिहितमेवेति॥व्यवहारहेतुरित्यनेनान्वितं॥तथा
चानुमानाप्रामाण्यंपरकीयसंदेहादिकंचसाधर्म्यदर्शनेनसंभाव्यतव्यवहारोययतिरिक्तकल्पमित्य
र्थः॥केचित्तुअभिहितमेवसाधर्म्यदर्शनंप्रमाणताप्रयोजकरूपपक्षधर्मत्वदर्शनं॥संभावनंअनुमानप्रामाण्य
संभावनं॥ननुसंभावनायांकथंअप्रामाण्यव्यवहारः॥कथंवापरकीयसंदेहादिकमनिर्णयतदुच्छेदाय
शब्दप्रयोगइत्यतआह॥संभावनेनचेति॥तथाचपरकीयसंदेहादिकमपिसंभाव्यैवतादृशःप्रयोगइत्यर्थं
व्याचक्रुः॥अपातइति॥यावदसतत्ख्यातिर्नव्यवस्थाप्यतइत्यर्थः॥तसिध्धौतुभ्रमस्यासतख्यातिरूपत
याभ्रमजनकत्वसिध्धावपिनाप्रामाण्याभावसिध्धिरितिभावः॥विषयबाधेति॥अप्रामाण्यभाववतिअ

प्राणपत्वप्रकारकत्वरूपअनुमत्वस्यविशेष्येप्यप्रामाण्याभाववर्तीविनानुपपत्तेरितिभावः॥शंशायोर्हिरजतत्वप्र
कारकत्वात्मकरजतत्वप्रमात्वमसाधारणधर्मदर्शनाच्चभवेतत्त्वकृतेनसंभवतीत्याह॥अनुगताकारासंस्पर्शि
नित्वादिना॥अनेनसाधारणधर्मवाधर्मिज्ञाननिरासः॥परमार्थ्यसदित्यनेनविशेषादर्शनस्यनिरासः॥तादृश
स्वलक्षणविशायककत्वस्यैवव्यावर्तकधर्मविधयासंशयविरोधित्वादिति॥कोटिरूपविशेषनिश्चयमपिदर्श
यति॥स्वेनस्वात्मकेनसंवेदनेनसंविदितंविषयं॥यीकृतंप्रामाण्यंयस्यैतिसविकल्पकेसंशयकारणोपपत्तिमाद
॥परंत्विति॥प्रत्यक्षेप्रमाणसंकाविरहात्कथमिंद्रियार्थसंन्निकर्षानंतरमुत्पन्नेज्ञानेऽप्रामाण्यसंशयानुभ
वइत्यतआह॥तदंतरभावि॥नीति॥समुत्पन्नरखिनोविषईकृतोअनुगताकारोयेनतत्र॥सन्मात्रेति॥अस
द्विषयत्वेसतिसद्विषयकत्वंसन्मात्रावलंवनत्वंतच्चननिर्विकल्पकविषयःअसत्यघटितमूर्तिकत्वाद्विषयि
तानवस्थापत्तेश्च॥नचदईसंभावनियं॥तथाप्रत्युत्पन्नेसन्मात्रावलंवनत्वप्रामाण्यादीनामप्रामाणिक
त्वापातात॥संभावनायाः प्रमात्वाभावादितिभावः॥सति॥ ॥इतिनिर्मितिलक्षणं॥ ॥छ॥ ॥छ॥ ॥